॥ ओ३म् ॥
क्षान्तिश्चेत् कवचेन किं किमरिभिः
क्रोधोऽस्ति चेद्देहिनां
ज्ञातिश्चेदनलेन किं यदि सुहृद
दिव्यौषधैः कि फलम्।
कि सर्पोर्यदि दुर्जनाः किमु
धनैर्विद्या न वन्द्या यदि
व्रीडा चेत्किमु भूषणैः सुकविता
यद्यस्ति राज्येन किम्।।21।।
(नीतिशतकम्)

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2018-20
Approved Journal by UGC - No 40484
सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेवसाइट.: www.sanskritsamvad.com मूल्यम्-रू. ५/-

॥ ओ३म् ॥
दाक्षिण्यं स्वजने दया
परजने शाठयं दुर्जने
प्रीतिः साधुजने नयो नृपजने
विद्वज्जने चार्जवम्।
शौर्यं शत्रुजने क्षमा गुरुजने
कान्ताजने धृष्टता
ये चैवं पुरुषां: कलासु
कुशलस्तेष्वेव लोकस्थिति।।22।।
(नीतिशतकम्)

卐 वर्षम्-९ 卐 अंकः-१ (१९३) 卐 १ जुलाईः २०१९ तः १५ जुलाईमासः २०१९ पर्यन्तम् 卐 विक्रमसंवत्-२०७६ 卐 सृष्टिसंवत्-१,९६,०८,५३,११७ 卐 पृष्ठम्-८

## संस्कृते ज्ञान-विज्ञानस्य अक्षुण्णभण्डारः -आचार्यबालकृष्णः

हरिद्वारम्। पतंजलियोगपीठस्य महामंत्री आचार्य बालकृष्णः उक्तवान् यत् संस्कृते ज्ञान-विज्ञानस्य अक्षुण्ण भण्डारः समृद्धोऽस्ति। वर्तमानसमये संस्कृतज्ञान् अनुकरणस्यावश्यकताऽस्ति। वर्तमान शिक्षानीते भारतसर्वकारः भारतीयसंस्कृति एवं संस्कृतभाषां प्रोत्साहितवान्। वालकृष्णः कांगड़ीवि. विद्यालयस्य द्विदिवसीया संस्कृतकार्यशालायाः शुभारम्भे उक्तवान्। ते उक्तवन्तः यत् संस्कृते निहित ज्ञान-विज्ञानं शोधमाध्यमेन विश्वस्य समक्षे आनितुं शक्यते। मुख्यवक्ता शिक्षासंस्कृतिउत्थान




न्यासस्य सचिव अतुलकोठारी उक्तवान् यत् देशे संस्कृतभाषाया उपेक्षा भवति परञ्च विदेशे तस्याः पूजनं भवति। अध्यक्षता समये विविद्यालयस्य कुलपति प्रो. विनोदकुमारः उक्तवान् यत् संस्कृतभाषायाः प्रोत्साहनाय प्रथमे गृहे संस्कृतवातावरणस्यावश्यकतास्ति।

विविद्यालयस्य कुलसचिवः प्रो. पीसीजोशी उक्तवान् यत् द्विदिवसीय ज्ञानमन्थनेन् अमतृरूपी ज्ञानं निस्सरिष्यति यो समाजाय हितकारी भविष्यति। पदम्श्री रमाकान्तशुक्लः उक्तवान् यत् नवोदयविद्यालये संस्कृतं नासीत् परञ्च शिक्षासंस्कृतिउत्थानन्यास एवं संस्कृतशिक्षकसंघस्य प्रयासेन संस्कृतपाठकक्रमं तृतीयएच्छिकभाषा रुपे भविष्यति। संस्कृत विभागाध्यक्ष प्रो. ब्रह्मदेवः एवं प्रो. सोमदेवः अतिथिनां स्वागतं कृतवन्तौ। कार्यशालायां प्रो. ऋषभप्रसादसेनः, ईश्वरदयालकंसलः, प्रो.रामनाथझा, प्रो. नरेशधीमानः, प्रो.रूपकिशोरशास्त्री स्वविचारं व्यक्तवन्तः। अस्मिन्नवसरे प्रो. एलजीपुरोहितः, प्रो.वी.के.सिंहः, प्रो. सोहनलालसिंहः, डॉ.मनोहरसिंहमीणा, प्रो.पीपीपाठकः, डॉ. पवनः, डॉ.संदीपउपाध्यायः, प्रवीणः, प्रकृति, संदीपउनियालः, आदयः उपस्यिताः आसन्।

## संस्कृतं विज्ञानं च परस्परं सहयोगिभूतेः-प्रो. महावीरअग्रवालः

हरिद्वारम्। गुरुकुलकांगडी विश्वविद्यालयस्य संस्कृतविभागे द्विदिवसीया संस्कृतसंवर्धमकार्यशालायाः समापनभवत्। मुख्यातिथि पतंजलिविश्वविद्यालस्य प्रतिकुलपति प्रो. महावीरअग्रवालः अक्तवान्




यत् संसारे सर्वाधिक सम्पन्नभाषा संस्कृतमस्ति। अस्या संवर्धनाय विश्वस्तरे कार्यं प्रचलति।

समापनसत्रस्य संवोधनसमयें प्रो. अग्रवालः उक्तवान् यत् संस्कृतमेवं विज्ञानं परस्परं सहयोगीनः। संस्कृतात् विना वैदिकमन्त्राणामुच्चारणं असम्भवः। ते उक्तवन्तः यत इदानीं 39 सांसदाः संस्कृते सपथग्रहणं कृतवन्तः। गुरुकुलकांगड़ीविश्वविद्यालयस्य कुलपति प्रो. विनोदकुमारशर्मा अध्यक्षीय संवोधने उक्तवानत् यत् अहं संस्कृतभाषायाः साधकोऽस्मि। संस्कृतभाषा सद्गुणकाय बहुउपयोगी वर्तते। अस्मिन्नवसरे जुगलकिशोरः , डॉ. मोहरसिंहमीणा, इश्वरदयालकंसलः, प्रो. ऋषभप्रसादसेनः, प्रो.रमानाथझा, प्रो. नरेशधीमानः, प्रो. एलपीपुरोहितः, डॉ. पवनः, डॉ.संदीप उपाध्यायः, संदीपउनियालः, प्रकृति प्रवीणादि उपस्थिताः आसन्।

## योगेन विश्वम् एकस्मिन् सूत्रे आनीतम्-वैंकेयानायडुः

नवदेहली। लालकिलापरिसरे अन्ताराष्ट्रियोगदिवसस्योपलक्ष्ये आयोजितसमारोहे शरीरं एवं समाज:अपि स्वस्थः भवेत् इति सन्देशः दत्तः । ब्रह्माकुमारीसंस्थायाः सहयोगेन आयुषमाध्यमेनायोजित समारोहे उपराष्ट्रपति वैंकेयानायडु महोदयेन सह चत्वारिंशत् सहस्त्र जनाः योगं कृतवन्तः।



योगकार्यक्रमे उपराष्ट्रपति योगं प्रति मोदी महोदयस्य सहयोगस्य प्रशंसा कृतवान्। भारतस्य अयं पुरातन पद्धति सम्पूर्ण विश्वं एकस्मिन् सूत्रे आनीतवान्। विश्वस्य 177 देशः एकस्वरेन् 21 जूनं विश्वयोगदिवस रुपे स्वीकृतम्। अयं केवलं व्यायामः नास्ति जीवनस्य मंत्रोऽस्ति। अस्य माध्यमेन् मानवस्य व्यक्तित्वे सकारात्मक प्रभावः भवति। अनेन जीवने शांति आगच्छति। कार्यक्रमे सर्वधर्मस्य जनाः भागं गृहीतवन्तः। चांदनीचौकस्थित शंकरमन्दिरस्य पंडितः मंत्रोच्चारणं कृतवान्। इतः पूर्वं वीकेचक्रधारीदीदी उपराष्ट्रपति महोदस्य स्वागतं कृतवान। वीकेआशा सर्वकारस्य प्रशंसा कृतवती।

## प्रधानमन्त्रिनरेन्द्रमोदिना 'मन की बात' इत्यस्य द्वितीयप्रकरणं आरब्धम्

नवदेहली। प्रधानमंत्री नरेन्द्रमोदीमहोदयस्यः बहुचर्चित कार्यक्रमं ''मन की बात'' इत्यस्य द्वितीयप्रकरणस्य प्रसारणं 2019 जूनमासस्य त्रिंशत दिनांके अभवत्। उल्लेखनीयोंस्ति यत् लोकसभा समये ''मन की बात'' कार्यक्रमस्य 53 प्रसारणं जातम्। अस्य प्रसारणस्य माध्यमेन प्रधानमंत्री मोदी भारतस्य जनतायाः विषये उक्त्वा तेषां मनसि स्वस्थानं स्थापितवान्



पुनः 54 प्रसारणे ते सप्तदशलोकसभायाः चर्चा समये पुस्तकस्य महत्वस्य विषये उक्त्वा प्रेमचन्द्रस्य कथायाः प्रासंगिता, जलसंरक्षणस्य आवश्यकता, जीवने योगस्य महत्व विषये ''मन की बात'' कृतवान।

## काव्यसृजनमहिलामंचमाध्यमेन भव्यसांस्कृतिक-सम्मानसमारोहस्यायोजनम्

नवदेहली। काव्यसृजनमहिलामंचनदेहली माध्यमेन् पद्मश्री रमाकान्तशुक्लस्य अध्यक्षतायामेकः



भव्य साहित्यिक, सांस्कृतिक एवं सम्मानसमारोहस्य आयोजनमभवत्। आई.टी.ओ.स्थित एन.डी.तिवारीभवने अस्य शुभारम्भो अभवत्। माँ सरस्वत्याः माल्यार्पणम्, दीपप्रज्वालनमेवं

शेषभागःपंचमपुटे

## श्लोकनिर्माणाकार्यशाला हरियाणायाः अद्भुत-घटना-डॉ माया

भिवानी। कीर्ति नगरेस्थित सांस्कृतिकसदने हरियाणासंस्कृतअकादमीपञ्चकुला एवं सांस्कृतिक मंचस्य संयुक्तत्वाधाने श्लोकनिर्माणकार्यशालायाः आयोजनमभवत्।



कार्यशालायाः शुभारम्भः आदर्शमहिलामहाविद्यालयस्य प्राचार्या डॉ.मायायादव, श्रीकृष्णप्रणामीसंस्कृतमहाविद्यालयस्य पूर्वाचार्य जगदीशप्रसादवशिष्ठः विद्यावास्पति डॉ. महावीरप्रसादः डॉ. सत्यपालशर्मा, डॉ. बुद्धदेवआर्य एवं डॉ. शिवनारायणशास्त्री संयुक्तरुपेण दीपप्रज्वालनं कृतवन्तः।

डॉ. माया संस्कृतश्लोककार्यशालां हरियाणाइतिहास्य अद्भुत घटना उक्वती। डॉ.वशिष्ठः 63 वर्णन् सुशोभित संस्कृतभाषायाः महत्वे प्रकाशं दत्तवान्। डॉ. महावीरप्रसादः संस्कृतश्लोकरचनायाः विषये उक्तवान्। शिवनारायणशास्त्री श्लोकनिर्माणे यति, गति, भाषा, छन्द एवं व्याकरणस्य महत्वं विषये उक्तवान्।

अस्मिन्नवसरे डॉ. जोगेन्द्रः, धर्मवीरकुंडु, सत्येन्द्रः, डॉ. सुधीरभुद्गल, डॉ. उमेशः, श्रीकृष्णमचरः, डॉ.जयपालशास्त्री, रामरतनशास्त्री एवञ्च रामधनशास्त्री तत्रासन्।

## 'सर्वे सपरिवारं योगं कुर्वन्तु' -कुलपतिः डॉ. श्रेयांशद्विवेदी

कैथलस्थे महर्षिवाल्मीकिसंस्कृतविश्वविद्यालये 'पञ्चम: अन्ताराष्ट्रिययोगदिवसकार्यक्रमः डॉ. भीमराव-अम्बेडकरराजकीयमहाविद्यालयस्य परिसरे समायोजितः। आयोजने विश्वविद्यालयमहाविद्यालयस्य च आचार्यकर्मचारिगणेन सहभागिता



विहिता । योगस्य शुभारम्भः 'योगेन चितस्य पदेन वाचा.....' इति योगश्लोकेन जातम् । सर्वे योगासन-सूर्यनमस्कारानन्तरं प्राणायामाः कृतवन्तः। विश्वविद्यालयस्य माननीय कुलपतिः डा. श्रेयांशद्विवेदिमहोदयेन योगविषये उक्तं यत् नीरोगं स्वस्थञ्च जीवनार्थं योगः नियमितरुपेण आवश्यकः । अस्मिन् कार्यक्रमोपलक्ष्ये कुलपतिमहोदयोनोक्तं यत् सर्वे सपरिवारं योगं कुर्वन्तु ।

अस्य कार्यक्रमस्य अध्यक्षत्वेन विश्वविद्यालयस्य कुलपतिः डॉ. श्रेयांशद्विवेदिमहोदयः, मुख्यातिथिरूपेण डॉ. भीमराव-अम्बेडकरराजकीयमहाविद्यालयस्य प्राचार्यः डॉ. ऋषिपालबेदिमहोदयः तथा च विशिष्टातिथित्वेन कृषिविभागप्रबन्धकः श्रीरामफलमहोदयः एवञ्च प्रेरणास्रोतमार्गदर्शकरुपेण संस्कृतविद्वान आचार्यसंतोषचन्द्रद्विवेदिमहोदयः आसन् । योगकार्यक्रमस्य समापनं कल्याणमन्त्रेण अभवत् ।

## समग्रदेशे त्रिभाषासिद्धान्ते हिन्दीभाषायाः अनिवार्यतायाः परिवर्द्धमानः विरोधः

नवदेहली। राष्ट्रीयशिक्षानीतेः प्रस्तावे त्रिभाषासिद्धान्ततः हिन्दीभाषायाः अनिवार्यता निवारणस्य विवादः सम्प्रति परिवर्धमानः दृश्यते। तत्र समितेः त्रिभिः सदस्यैः प्रस्तावे परिवर्तनस्य मुखररूपेण विरोधः कृतः, तेषां कथनमस्ति यत् यदा संविधाने अपि हिन्दीभाषां राष्ट्रभाषा रूपेण निर्माणस्य चर्चा कृतास्ति तर्हि तत्र परिवर्तनं किमर्थम्?

महत्वपूर्णमस्ति यत् नवशिक्षानीतेः प्रस्तावे परिवर्तनस्य विरोध : नीतिनिमार्तृसभायाः सदस्येषु दृश्यते। यद्यपि अस्य प्रारम्भः डॉ.कृष्णमोहनत्रिपाठिमहोदयेन तथा डॉ.आरएसकुरीलमहोदयेन कृतः। अधुना अस्मिन् विरोधे सभायाः तृतीयः सदस्य तथा च जवाहरलालनेहरुविश्वविद्यालयस्य प्रो.मजहरआसिफमहोदयः अपि तृतीयसदस्य रूपेण सम्मिलितः। प्रो.मजहरमहोदयेन कथितं यत् अस्यां नीतौ त्रिभाषासिद्धान्तः विशदविमर्शपूर्वकं राष्ट्रहितं च अवधार्य प्रस्तावितः। पूर्वमपि शिक्षानीतिनिर्माणार्थं संगठितायां सभायामपि हिन्दीभाषायाः स्वीकार्यता प्रस्ताविता। समित्या अपि संविधानस्य पूर्वसमितीनां च मते स्वीकृतिं प्रदर्श्य एतत् प्रस्तावितम्। तैः कथितं यत् खेदस्य विषयः वर्तते यत् स्वतन्त्रतायाः पश्चात् अद्य पर्यन्तमपि अस्माकं देशस्य काऽपि एका आधिकारिका भारतीयराष्ट्रभाषा नास्ति। काचित् भारतीयभाषा एव राष्ट्भाषा भवेदिति धिया नवशिक्षानीतेः प्रस्तावे त्रिभाषासिद्धान्तान्तर्गन्तं हिन्दीभाषा एतदर्थमेव सम्मिलितास्ति। हिन्दीभाषा समग्रं भारतदेशं एकस्मिन् सूत्रे निबन्धनस्य एका भारतीया भाषा वर्तते। अत्र जायमानं हिन्दीभाषायाः विरोधः पूर्णतया राजनीतिकं प्रतिभाति।

## नियमनिर्माणेन भवेत् राममन्दिरस्य निर्माणम्-उद्धवः

अयोध्या। शिवसेनाप्रमुख उद्धवठाकरे उक्तवान यत् भाजपा भवतु अथवा शिवसेना अभयोः हिन्दुत्ववादी संगठनमस्ति। विषये शिवसेना एवं समग्रविश्वस्य हिन्दु तेन सह अस्ति। ते उक्तवन्तः यत् शीघ्रमेव अयोध्यायां राममन्दिरस्य निर्माणकार्य




राममन्दिरस्य विषये उक्तवान् यत् राममन्दिरस्य समस्या न्यायालये लंबितोऽस्ति। इदानीं देशे सक्षमः सर्वकारोऽस्ति। अस्माकं इक्षा अस्ति यत् नियमस्य माध्यमेन मन्दिरस्य निर्माणं भवेत्। मन्दिर प्रचलिष्यति। ते उक्तवन्तः यत् इतः पूर्वं अत्रागतं पुनः सम्पूर्ण संगठनेन् सह जूनमासे अत्रात्रतम्। अत्र पुनः पुनः आगमनस्य इक्षा भवति।

## संस्कृतस्य प्रचारः आवश्यकः

रेवाड़ी। गढ़ीबोलनीमार्गेस्थित पीजीमहाविद्यालये दसदिवसीय संस्कृत संभाषणशिविरस्य समापनमभवत्। अस्मिन्नवसरे मुख्यवक्तारुपे संस्कृतोपासक दिनेशकामतः संस्कृतस्य महत्वस्य वर्णनं कृत्वा उक्तवान




यत् संस्कृतं विश्वस्य परिष्कृत भाषा अस्ति। संस्कृतस्याध्ययनेन् मनुष्यः सर्वेषु विषयेषु दक्षता प्राप्तुं शक्यते। इदानीं विदेशेषु अपि संस्कृतस्य प्रचार प्रसारं च भवति। ते सर्वान् संस्कृतज्ञान् उक्तवान यत् संस्कृतस्य प्रचार प्रसारं च कुर्वन्तु।

अस्मिन्नवसरे हरियाणा संवि.विद्यालयस्य कुलपति डॉ. श्रेयांशद्विवेदी संस्कृतभाषायाः विकासविषये उक्तवान्। ते उक्तवन्तः यत् कस्यापि विषयस्य अध्ययने संस्कृतस्य भागं अवश्यमेव भवितव्यम्। शिविरस्य समापनावसरे मुख्यातिथि त्रिलोकचन्द्रशर्मा अपि संस्कृतं सर्वत्र प्रचारार्थमुक्तवान्।

अस्मिन्नवसरे गुरुग्रामविभागसंयोजक प्रमोदशास्त्री सर्वेषामाभारं कृतवान् शिविरस्य विषये संस्कृतभारत्याः सचिव अश्विनीशर्मा उक्तवान् यत् अत्र द्विशत् जनाः संस्कृतस्य ज्ञानं गृहीतवन्तः।

अस्मिन्नवसरे महर्षिवाल्मिकीविश्वविद्यालयस्य कुलसचिव डॉ. यशवीर, एमपीगोयलः, अशोकबुचौली, संस्कृतभारत्याः जिलासचिव डॉ.नरेन्द्रः, प्रवेशकौशिकः, मुख्यशिक्षक सत्येन्द्रकुमारः स्वयोगदानं दत्तवन्तः।

## साहित्याकदम्याः संस्कृतभाषाया युवपुरस्कारः



साहित्याकादम्याः 2019 ख्रीस्टीयवर्षस्य युवपुरस्कारः बालसाहित्यपुरस्कारश्च जूनमासस्य चतुर्दशदिनाङ्के उद्घोषितः। अस्मिन् वर्षे साहित्याकदम्याः संस्कृतभाषाया युवपुरस्कारः 'वाग्विलासिनी' रचनायाः कृते संस्कृतस्य युवकवये युवराजभट्टराई महोदयाय प्रदास्यते। साहित्याकादम्या बालसाहित्यपुरस्कारश्च 'चित्वा तृणं तृणम्' (बालककवितासङ्ग्रहः) इति रचनार्थं डा.संजयकुमारचौबे वर्याय समर्पयिष्यते। साहित्याकादमी आयोज्यमानकार्यक्रमे उभाभ्यां रचनाकाराभ्यां ताम्रफलकं पञ्चाशत् सहस्त्ररुप्यकाणां राशिं च प्रदाय सम्मानं विधास्यति।

## श्राद्धपद्धत्यां पीएचडी कृतवती जापानदेशीया



भारतस्य संस्कृति एवं तस्याः आध्यात्मिक पृष्ठभूमि प्राचीनकालादेव बहु समृद्धोऽस्ति। अस्माकं आध्यात्मिक गुणानां चर्चा सर्वत्र अस्ति वेदः, पुराणम्, अथवा श्लोकस्य भवतु अस्य वैज्ञानिकतायाः चर्चा सर्वत्र अस्ति। एतादृशी शोधार्थि अस्ति तोमोका-मुशिगा जापान देशस्य गीफू नगरस्य। तामपि भारतस्य आध्यात्मे रूचिरस्ति। टोक्यो विश्वविद्यालयतः स्नातकोत्तरं कृत्वा सा हिन्दुधर्मस्य श्राद्धविषये शोधं-कृतवती एतदर्थं सा विहारप्रान्तस्य गया नगरे विंशति मासपर्यन्तं स्थित्वा स्व शोधपत्रं प्रस्तुतवती। इदं शोधपत्रं अन्ताराष्ट्रिय जर्नले अपि प्रकाशितमभवत्। एवं पटनायां मिथिलाभारत्यां प्रकाशितमभवत्। भारतस्य विषये सा उक्तवती यत् एकदा अहं 2008 तमे वर्षे भ्रमणाय वाराणसी आगतवती तदा मनसि आगतं अत्रत्याः धार्मिककर्मकांडोपरि शोधकरणार्थम्।

## जिंदोपुरे अद्यापि भवति वेदपाठः



ठेकमा। धर्मसंघगिरीशदत्तसंस्कृत उत्तरमाध्यमिकविद्यालयजिंदोपुरे सांस्कृतिककार्यक्रममभवत्। शुभारम्भः मुख्यातिथि कैथलहरियाणासंविविद्यालयस्य कुलपति डॉ. श्रेयांशद्विवेदी दीपप्रज्वालनमेवं सरस्वत्याः पूजनं कृतवान्। डॉ. द्विवेदी उक्तवान यत् इदं ग्रामं वेदव्यासस्य स्थल रुपे प्रसिद्धोऽस्ति। अत्र बहु विद्वान्सानां प्रादुर्भावः अभवत्। अस्य विद्यालयस्य स्थापना स्व० चंडीप्रसादपाठकः कृतवान्। अद्यापि, अत्र वेदपाठं भवति। संस्कृतभाषा अस्माकं देशस्य संस्कृति एवं सभ्यतायाः परिचयं कारयति। अस्मिन्नवसरे प्रबंधक सुर्चनारायणपाठकः देवनारायणपाठकः अनिलपाठकश्च उपस्थिताः आसन्।

नाटिका

# अमृतसञ्चयः

--डॉ अरविन्दकुमारतिवारी

नान्दी

यत्तत्त्वं प्रकृतौ मतं परमहो यत्प्राप्य सुस्थाः समे
जीवा येन लसन्ति सर्वतरवो यस्मै जगद् धावते।
यस्माद् हन्त विना नृजीवनमिदं मन्ये विशुष्कं ध्रुवं
यस्मिन् सृष्टिरियं विभाति मुदिता तोयं नुमस्तद् वयम्।।1

सूत्रधारः- उत्तमं स्तुतं सलिलं ध्वनिना। सत्यमेवैतत् श्रूयताम्-

जलमेव बलं लोके जलमेव धनं मतम्।
जलमेवामृतं दिव्यं रक्ष्यतां रक्ष्यतां जलम्।।2

(प्रविश्य)

नटी- (कटितटे शिरसि च कलसयुगलं वहन्ती) निर्दयरवितापो रावयति निखिलानपि जीवान्। आषाढस्य प्रथमदिवसो*पि तूष्णीमेवेतो निर्गतः। न गर्जितं छलिना घनेन न वा वृष्टमेवाधुना। किं करवाणि? सुदूरं निर्गमिष्यति स्वामी श्रमार्थम्। समयेन प्रातराशो*स्ति देयः। जलमपि गृहे न वर्तते। अतस्तदाहर्तुं चलामि।

(सूत्रधारमवलोक्य) अये महानुभाव! किं क्रियते*त्र सुप्रभाते?

सूत्रधारः- अयि सुन्दरि! प्रचण्डसूर्यातपप्रभावेण शुष्कास्तडागाः पार्श्वस्थाः? दूरं ते गन्तव्यं भविष्यति सलिलानयनायेति विचिन्त्य दुनोति चेतः।

नटी- महानुभाव! तडागाः शुष्का नैव। बलिभिर्जनैर्भवद्भिः तडागभूमिरधिगृहीता। तत्र च गगनचुम्बिभवनं भवतां दूरत एव दृश्यते। नोपदेशो देयः। मार्गे कण्टकं प्रसार्य पादच्छेदे सान्त्वनाप्रदानं किमर्थम्? तडागो दूरं वा भवेत् पार्श्वे वा, गन्तव्यन्तु भविष्यत्येव। साधुवाद एतत्परामर्शायेति।

(बुदबुदायमाना निर्गता नटी)

सूत्रधारः- ( सत्यं कथितं नट्या) वयमेव ग्राम्या नरा दोषभाजः जलसमस्यायाः। यदि सार्वजनिकतडागभूमिः अधिगृहीता नाभविष्यत् तदा ग्रामजलस्तरो दूरं नागमिष्यत्। अस्तु ग्रामं गच्छामि। पश्यामि बन्धवो मे जलसमस्याग्रस्ताः किं कुर्वन्तो वर्तन्त इति।

(किञ्चिदग्रे उपसृत्य कलहं पश्यन्)

अहम् अग्रे जलं ग्रहीष्यामि, नैव अहं पूर्वमागतो वर्ते, मदीयमेव पात्रं पूर्वं जलपूर्णं भविष्यति, कथं त्वमधुनैवागतो*सि विरम।

रमेशः- अरे! अपसारयत जलपात्राणि यूयम्। मम स्वामिनो ग्रामप्रधानस्य पात्राणि पूर्वं पूरितानि भविष्यन्ति, ततः शिष्टेन जलेन युष्माकं पात्रपिपासा दूरीभविष्यति।

(आत्मगतम्) एते ग्रामवासिनो मे सर्वकारप्रदत्तजलमादातुं कलहायन्ते। इतो दूरमेवापसरामि। अन्यथा मम शिरोविस्फोटनं नूनमेव भविष्यति। प्रातरेव तया तर्जितो*स्मि वाचालया नट्या।

(निर्गतः)

मुकुलः- रमेश! दूरमपसर, सर्वमपि पश्यामि, त्वं सद्य एवागतः प्रथमं जलमादातुमीहसे कथम्? ग्रामप्रधानस्य सेवको*सि। गत्वा तं बोधय। ह्यो*पि तेन सर्वमपि जलमाहृतं, येन अस्माकं गृहे बालकाः शिशवो वृद्धा रुग्णा अपि जनाः जलदर्शनमपि न कृतवन्तः। अतः अद्य तु अस्माकमेव गृहे जलं गमिष्यति।

(सर्वे सस्वरं मुकुलस्य समर्थनं कुर्वन्ति)

रमेशः- अरे! मुकुल! नेता भवितुमिच्छसि? जानीहि ग्रामप्रधानस्य पुत्री तरणताले स्नाति। तत्र जलन्यूता लक्ष्यते, सा रुष्टा नैवा स्नाति। अस्यां परिस्थितौ यदि नाहं जलं नीत्वा गमिष्यामि तदा ग्रामे जलमेव नागमिष्यति।

मोहनः- किं सर्वकारः ग्रामप्रधानस्य हस्तपुत्तलिका अस्ति?

रमेशः- यथा वा मन्यताम्।

मुकुलः-

रे तोयमेतदखिलं तव वर्तते किं
ग्रामप्रधानगृहसेवक! याहि गेहम्।
दास्याम एव जलबिन्दुमितो वयं नो
स्नानार्थमद्य वद तं धनमानमत्तम्।। 3

(पुनः सर्वे हु हु कुर्वन्ति।)

(काचिद् ग्राम्या नारी व्यग्रा स्वघटं हस्तेन रिक्तं दर्शयन्ती )

गायत्री - पुत्रः प्रोदिति चिरात् शृणु पुत्र रुग्णः
पातु जलं न सदने जलमस्ति श्वस्तः।
पात्रे ददस्व लघु तोयमये सुपुत्र!
पुण्यं लभस्व बहु ते*नुनयं करोमि।।4

प्रेम-

अहो पूर्वमस्यै जलमस्ति देयम्। तावद् विरमन्तु सर्वे
दूरं प्रयान्तु सकला जलमाप्तुकामाः
सम्पूर्यतां कलशपात्रमिदं तु मातुः।
पूर्वं पिपासितजनस्य गृहे तु तोयं
देयं ततो*परजनस्य कृते सखायः!।5

सत्यदेवः- अरे रे रे कथं जलं नायाति टैंकरतः?

अद्यापि हन्त सलिलं मम पात्रके*स्मिन्
स्वल्पं समागतमिदं सदने चलामि।
भार्या महानसकपाटतटे सरोषं
भाषिष्यते गतदिने न्यगदद् यदासीत्।। 6

अमरः- भ्रातः! भ्रातृजाया अद्यापि आरार्तिक्यस्थालीपात्रं करे दधानां त्वां प्रतीक्षते। अहमागच्छन् दृष्टवान् यद् बुभुक्षितसिंहिनीव मुख्यद्वाराद् गृहद्वारपर्यन्तं धरां कम्पयन्ती वर्तते। वदति च प्रातरेव पतिर्मे जलाहरणाय प्रयाति, किन्तु अन्ते धर्मकार्यं कृत्वा कदाचित् रिक्तजलपात्रं दर्शयन् समायाति। अद्य तु तस्य चिकित्सामेव करिष्ये यदि जलपूर्णं कलशं नानयति तदा।

सत्यदेवः- अहो अहं कथयन् आसं किन्तु एते मां त्यजन्त्येव न मनोरंजनप्रियम्। किं करवाणि? जागरिता महाकाली ज्वलत्काष्ठं करे वहन्ती मामद्य ज्वालयिष्यतीवेति ज्ञात्वा हृदयं कम्पते। रितेश! त्वमेव मम कलशं गृहीत्वा तस्मै प्रयच्छ। ब्रूहि च भ्रातुः उदरविकारो वर्धते। अतः वृक्षच्छायामाश्रयते।

रितेशः- अहमपि बिभेमि, किन्तु गच्छामि।

( प्रथमं दृश्यं समाप्तम्)

(द्वितीयं दृश्यं )

(रिक्तकलशयुगलवती नटी प्रविशति)

नटी- ग्रामान्तरे गतवती जलमाप्तुकामा
तत्रापि नैव सलिलं परिपूर्णमस्ति।
तत्रत्यवासिजनता लगुडं दधाना
रक्षन्ति पेयमहहा ददतीव नो मे।। 7

रम्भा- सखि! जानामि ते व्यथाम्। एते जातिगतभेदभावं पालयन्तः तुभ्यं जलं न प्रयच्छन्ति। आगच्छ मम गृहे यद्यपि स्वल्पमेव जलमस्ति तथापि तुभ्यं प्रदास्यामि। पतिस्ते श्रमिको दूरं गच्छतीति जानामि। शीघ्रं गच्छ गृहम्।

(गृहं गत्वा नटीकलशे जलं निक्षिपति)

नटी- कथं ते प्रियं वदानि? त्वमेव प्रतिदिनं मां रक्षसि। न जाने कदा वारिदा जलं दास्यन्ति? अस्तु गच्छामि सखि!

(नटी निर्गता)

(अत्रान्तरे महान् जनरवः समुत्थितो भवति।)

आगता विद्युत् आगता विद्युत् आगता विद्युत् इति। समरसेबिलं चालयामः।

एकः- भ्रातः! समरसेबिलचालने प्रतिबन्धो वर्तते सर्वकारपक्षतः। श्रुतं मया यदद्य सर्वकारः सर्वेषामपि समरसेबिलम् अधिग्रहीष्यतीति। यतोहि जनाः जलस्य दुरुपयोगं कुर्वन्ति।

(एतन्मध्ये ध्वनियन्त्रेण ध्वनिः श्राव्यते।)

भो भो ग्रामीणाः! यूयं निजसमरसेबिलं नैव चालयिष्यथ। सर्वकाराज्ञया सर्वेषामपि समरसेबिलं सार्वजनिकं घोष्यते। सर्वकारो*द्य अधिग्रहीष्यति। प्रातः सायं समयेन वयमागत्य समरसेबिलं चालयित्वा जलं प्रदास्यामः। जलं भोजने घृतमिव प्रयोज्यमस्ति।

संजयः- सम्यक् कृतं सर्वकारेण। एतेन समरसेबिलेन जनाः जलदोहनमकुर्वन्। येन जलस्तरो निम्नतां गतो वर्तते। केचित् तु

प्रभाते पशून् तोयधाराभिरेते
मृदा स्नापयनन्तीव होरां प्रकामम्।
गृहं क्षालयन्तीव तोयैर्यथेच्छं
स्वयं कुर्वते चाभिषेकं जलौघैः।। 8

विमलः-साधु प्रोक्तं मित्रेण। एते जनाः प्रचुरं जलं नालिकायां व्यर्थमेव प्रवाहयन्ति। यद्वशाद् दुर्लभमिदानीं संवृत्तमस्ति पेयं जलमिति। किं च

जलं नष्टं दुष्टैः प्रकृतिकृपणैः स्वार्थिमनुजैः
स्वसस्यानां सेके समरसिबिलेनैव बहुभिः।
जलं पार्श्वे चासीद् यदपि च गतं दूरमधुना
यतो द्रव्यैः क्रेयं सलिलममलं पेयमहहा।। 9

आशुतोषः- सुहृदः! ममैको वर्तते परामर्शः। अस्माभिः पूर्वं तु ग्राम्यास्तडागाः पुनर्जलेन पूरणीयाः रक्षणीयाः। वृष्टिजलमपि संरक्षणीयं कृत्रिम जलाशय इति।

ग्रामे तडागः किल रक्षणीयः
शुष्के जलं वृष्टिकृतं च रक्ष्यम्।

शेषभागःपंचमपुटे


## राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः
(भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनम्,
गुणवत्ताप्रत्यायनपरिषदा 'ए' श्रेण्या प्रत्यायितम्)
56-57, संस्थागतक्षेत्रम्, जनकपुरी, नवदेहली -110 058

### विशिष्टसंस्कृतसेवाव्रतिसम्मानप्रदानाय नामनिर्देशनार्थ आमन्त्रणसूचना

राष्ट्रियसंस्कृतसंस्थानेन प्रतिवर्षं "विशिष्टसंस्कृतसेवाव्रतिसम्मानः" तादृशविद्वद्भ्यः प्रदीयते ये संस्कृतक्षेत्रेतराः भूत्वापि पारम्परिकशास्त्राणां गभीरानुशीलनेन शोधमौलिकसाहित्यसर्जनेन तथा संस्कृतसम्बद्धकलानैपुण्येन च पारम्परिकशास्त्रेषु संस्कृतानुसन्धानाध्ययनक्षेत्रेषु महत्त्वपूर्णं योगदानं विदधानाः संस्कृताय दत्तजीवनाः वेविद्यन्ते।

प्रतिवर्षं संस्कृतसप्ताहोत्सवस्य मुख्यसमारोहे (श्रावणीपूर्णिमायाम्) अधिकाधिकं त्रिभ्यः विद्वद्भ्यः प्रशस्तिपत्रेण सह एकलक्षपरिमितधनराशिः सेवाव्रतिसम्मानरूपेण प्रदीयते। अस्मिन् वर्षे संस्कृतसप्ताहोत्सवः 12 तः 18 अगस्त, 2019 पर्यन्तम् आयोजयिष्यते। तदर्थं भारतदेशस्य सर्वेषां विश्वविद्यालयानां कुलपतयः तथा संस्कृतविभागप्रमुखाः प्रार्थ्यन्ते यत् संस्कृतक्षेत्रेतराः भूत्वा अपि संस्कृतार्थं विशिष्टं योगदानं विदधानानां विदुषां नामानि तेषां पूर्णविवरणेन (सप्रमाणम्) सह 25.07. 2019 (5.00 वादनं) पर्यन्तं संस्थानं प्रति पोस्टल द्वारा अथवा rskspvc@yahoo.com ई-मेल संकेतं प्रति प्रेषयितुं शक्नुवन्ति।

25 जुलै, 2019 दिनाङ्कात् पश्चात् प्राप्तानि नामानि सेवाव्रतिसम्मानार्थं नैव परिगण्येरन्।

कुलसचिवः

# सम्पादकीयम्

मान्या अमरवाणीसेविनो विद्वांसः, ललितकवयः!

सादरं नमोनमः।

'योगः कर्मसु कौशलम्' इति श्रीमद्भगवद्गीतोक्तं वचनं जीवनस्य निर्मलं निष्कण्टकं मार्गं दर्शयतीवेति मन्यामहे वयं भारतीयाः वैदेशिकाश्चेति। श्रीमद्भगवद्गीता भारतीयसंस्कृतेरमूल्यो निधिरस्ति। कर्मयोगं शिक्षयन्ती धर्ममार्गं प्रदर्शयन्ती लोककल्याणं कुर्वती चेयं वन्द्या मातेव सर्वान् रक्षति योगद्वारा। अनेनैव प्रकारेण महर्षिणा पतञ्जलिना विरचितं योगदर्शनमपि भारतीयसंस्कृतेः बहुमूल्यो निधिर्वर्तते। अस्मिन् योगदर्शनस्य ग्रन्थे सर्वोत्तमजीवनपद्धतेः सूत्राणि प्रदत्तानि सन्ति। त्रिकालदर्शिना महर्षिणा योगगुरुणा पतञ्जिलना मानवानां परमपुरुषार्थाय योगविद्या प्रदत्ता। तेनेदं स्पष्टीकृतं यद् याश्चित्ततवृत्तयो वर्तन्ते ता एव निरोद्धव्याः। अयमेव योग इति। यथा

'योगश्चित्तवृत्तिनिरोधः' अत्र विज्ञेयमस्ति यत् विविध विषयगामिन्यश्चित्तवृत्तयोऽस्माकं निरन्तरं व्याकुला भवन्ति। इमाः पापायापि वहन्ति पुण्यायापि। याः पुण्यशीलास्ता नैव निरोद्धव्याः।

यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिषु योगांगेषु सर्वेषामपि विशिष्टं महत्त्वमस्ति। मानवजीवनाय इमानि परमावश्यकानि मन्यन्ते। योगेन अनेके रोगा दूरीक्रियमाणाः सन्ति। भारतस्य बाबारामदेवाख्यो योगगुरुः इदानीं सम्पूर्णे*पि भूभागे योगध्वजमुत्तोलयतीति ज्ञात्वा दृष्ट्वा चेतो मुदितं भवति। अवश्यमेव पतञ्जलियोगपीठस्य भूमिका दर्शनीया वर्तते। प्रतिवर्षम् अगणितजना योगेन स्वस्था भवन्तीति को न जानीते? भारतस्य प्रभावेणैव 21जूनदिनांके योगदिवसो मान्यते सर्वत्र। अयं दिवसः प्रमाणयति यत् योगेन को लाभ इति। अस्माभिरपि योगमार्गोऽनुसन्धेयः।

अस्तु भवन्तो भवत्यः इमाः भारतीया विद्याः अग्रे आनयन्तु देववाणीं प्रसारयन्तु चेति प्रार्थयमाना विरमामि।

—भवदीया सम्पादिका

## वेदामृतम्

**( ऋग्वेदभाष्यम् )**

(प्रथमाष्टकः प्रथमोऽध्यायः तृतीयोऽनुवाकः)

ये महो रजसो विदुर्विश्वे देवासो अद्रुहः।
मरुद्भिरग्न आ गहि॥३॥

अर्थ–जो विद्वान् लोग अग्नि से आकर्षण व प्रकाश द्वारा तथा पवनों की चेष्टा द्वारा धारण किये हुए लोक हैं, उनको जानकर उनसे कार्यों में उपयोग लेना जानते हैं, वे ही अत्यन्त सुखी होते हैं ॥३॥

फिर उक्त पवन किस प्रकार के हैं, इस विषय का उपदेश अगले मन्त्र में किया है–

उग्रा अकमानचरनधिष्टास ओजसा।
मरुद्भिर आ गहि॥४॥

अर्थ–जितना बल वर्तमान् है उतना वायु और विद्युत् के सकाश से उत्पन्न होता है, ये वायु सब लोकों के धारण करनेवाले हैं, इसके संयोग से बिजुली वा सूर्य आदि लोक प्रकाशित होते तथा धारण भी किये जाते हैं, इससे वायु के गुणों का जानना वा उनसे उपकार ग्रहण करने से अनेक प्रकार के कार्य सिद्ध होते हैं ॥४॥

फिर भी उक्त वायु कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है।

ये शुभ्रा घोरवर्पसः सुक्षत्रासो रिशादसः॥
मरुद्भिरग्न आ गहि॥५॥

अर्थ–जो यज्ञ के धूम से शोधे हुए पवन हैं, वे अच्छे राज्य के करानेवाले होकर रोग आदि दोषों का नाश करते हैं और जो अशुद्ध, अर्थात् दुर्गन्ध आदि दोषों से भरे हुए हैं वे सुखों का नाश करते हैं, इस से मनुष्यों को चाहिए कि अग्नि में होम द्वारा वायु की शुद्धि से अनेक प्रकार के सुखों को सिद्ध करें ॥५॥

यह छत्तीसवाँ वर्ग पूरा हुआ। फिर भी उक्त पवन कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया हैये नाकस्याधिरोचने दिवि देवास आसते। मरुद्भिरग् आ गहि॥६॥

अर्थ–सब लोक परमेश्वर के प्रकाश से प्रकाशवान् हैं, परन्तु उसके रचे हुए सूर्यलोक की दीप्ति, अर्थात् प्रकाश से पृथिवी और चन्द्रलोक प्रकाशित होते हैं, उन अच्छे-अच्छे गुणवालों के साथ रहनेवाले अग्नि को सब कार्यों में संयुक्त करना चाहिए ॥६॥

फिर उक्त पवन किन कार्यों के हेतु होते हैं, इस विषय का – उपदेश अगले मन्त्र में किया है।

# 'विक्रमचरितम्' इत्युपन्यासस्य स्थानं महत्त्वञ्च

**डॉ. सुमित्रा देवी**
संस्कृतप्राध्यापिका
विद्यालयशिक्षाविभागहरियाणा

संस्कृतसाहित्यस्य वृत्तप्रयोगविरहिता गद्यकाव्यविधा कविकर्मणो निकषत्वं भजते। अत एव प्रथितं विद्वत्समाजे –

'गद्यं कवीनां निकषं वदन्ति।'

अथ कालात्ययेन भारतवर्षे पाश्चात्त्यसाहित्यानुशीलनात् तत्साहित्यगतविधासु अन्यतमा गद्यमयी उपन्यासविधा बङ्गभाषाद्वारेण संस्कृतवाङ्मये सङ्क्रान्ता। संस्कृतप्राक्तनकथाऽऽख्यायिकाभ्यां शैल्यादर्शचरित्रवैचित्र्यसंवादसमवेदनादेशकालौ चित्यकौतूहलादीनां सन्निवेशात् सर्वथा भिन्ना वर्तते। पं.अम्बिकादत्तव्यासप्रणीतं 'शिवराज विजयमिति' उपन्यासकाव्यं संस्कृतोपन्यासपरम्परायाः प्रथम उपन्यासो वर्तते। ततः प्रभृति पञ्चाशान्मितैरुपन्यासकारैः अशीत्यमिता उपन्यासाः प्रणीताः। एवं संस्कृतसाहित्ये उपन्यासप्रणयने सत्यां सुदीर्घशृङ्खलायाम् अन्यकाव्यविधापेक्षया विरलतावलोक्यते।

अथ संस्कृतसमवाये विश्रुतविद्वद्वरेण्यकविसमालोचकेन विविध मानमानितेन प्रो.राधावल्लभत्रिपाठिना गद्यविधामाश्रित्य वर्तमानयुगराजनीतिमालक्ष्य प्रवृत्तिनिवृत्तिकृत्याकृत्यमार्गमुपदिशता 'विक्रमचरितम्' इति उपन्यासाख्यानकाव्यं प्राणायि। एतद् उपन्यासकाव्यम् कथावस्तु-विषय-युगबोधदृष्ट्या नवीनं युगानुकूलं च सत् उपन्यासवाङ्मये विशिष्टं महत्त्वमादधाति, येनास्य स्थानमुत्कृष्टं सिद्ध्यति। आधुनिककाव्येषु च शोधसमीक्षाकार्याणां विरलतामनुभूय सुरभारतीं प्रति श्रद्धानया विनयविनीतया मया 'विक्रमचरितम्' इत्युपन्यासस्य समीक्षात्मकमध्ययनम् इति शोध शीर्षकविषयमवलम्ब्य शोधकार्यं सम्पादितम्। अस्य समीक्षात्मकमध्ययनं विदधत्या अल्पधिया मया कानिचन मौलिकानि साहित्यसमाजोपयोगीनि तत्त्वानि अधिगतानि यानि अनुपाल्य अस्याध्येतारोऽन्ये च नूनं लाभान्विताः भविष्यन्ति, इति आशासे।

संस्कृतसाहित्यस्याधुनिककाव्यशास्त्रिभिः कथाऽऽख्यायिकयोः मिश्रभेद उपन्यासः स्वीकृतः। प्रो.राधावल्लभत्रिपाठिना महाकाव्यकथायाः गद्यविधायां निबन्धनमुपन्यासः कथितः।

उपन्यासस्य स्थानम्

प्रो.राधावल्लभत्रिपाठिविरचितं 'विक्रमचरितम्' इति उपन्यासकाव्य संस्कृतोपन्यासवाङ्मये विशिष्टं महत्त्वपूर्णञ्च स्थानं भजते। एषः उपन्यासः वर्तमानकालिकीं राजनीतिं लक्षयति, येन समाजः साहित्यं शिक्षा च विकृतिम् उपयान्ति।

अस्य कथावस्तु कल्पनाप्रसूतं वन्यजीवाश्रितं च वर्तते। पञ्चतन्त्रहितोपदेशप्रभृतिषु व्यवहृतां निर्दशनाशैलीमवलम्ब्य प्रणीतोऽयमुपन्यासः सामाजिक-राजनैतिक-साहित्यिक-विसंगतीश्च प्रकटयति, एतेनास्य युगानुकूलविषयत्वं सामाजिकं मुकुरत्वं च निश्चीयते।

अस्य नायकः उचितगुणोपेतः स्वार्थसाधनपरायणैरमात्यैः पदध नलाभसम्मानावाप्तये येन केनापि उपायेन पदच्युतो विधीयते, तैः स्वीयाः स्वार्थाश्च साध्यन्ते। एतत् परिदृश्यं समाजेऽस्मिन्नपि परिलक्ष्यते यत्र लोकसेवासमाराधनपरः सुयोग्यो राष्ट्रसमाजोन्नयनपरायणो राजा स्वार्थसाधकैः मन्त्रिभिः सर्वविध पायैः प्रवञ्च्यते निरुध्यतेऽवहीयते च।

अस्याङ्गिरसो जुगुप्सास्थायिमूलको बीभत्सो वर्तते। बीभत्सप्रध नानि काव्यानि अङ्गुलिगण्यान्येव, तेष्वपि उपन्यासोऽयम् अद्वितीयो वर्तते। राढापुरवीथीषु मलमूत्रपूतिपङ्किलाः मार्गाः, घूकरः तद्भार्याश्च बीभत्सपरिपाकमास्वादयन्ति सेचसां चेतस्सु।

'विक्रमचरितम्' इति उपन्यासो युगानुकूलं विषयमावहति। स्वार्थसाधनपरायणाः प्राप्तोच्चपदाः अयोग्यानेव बन्धुबान्धवान् उच्चपदेषु स्थापयन्ति, येन तद्देशात् प्रतिभापलायनं जायते, सममेव समाजे जातिवर्गभेदेन द्वेषविषं प्रसरति। कृषकाः श्रमिकाश्च भृशं परिश्रमं विधायापि दीनहीनः निर्धनाश्च सन्ति तत्रैव सामन्तः तिलकसिंहः स्वतनयैः सह सुखसौविध्यानि भुनक्ति। ईदृशी दशा समाजस्य कृते शुभावहा न भवति। उपन्यासे सामाजिकस्थितेः समाश्रयणात् काव्यमिदं युगानुकूलं सिद्ध्यति।

अथ निदर्शनाविधासमाश्रितः बीभत्सरसप्रधानोऽयमुपन्यासः युगानुकूलः वर्तमानराजनीतिं तत्कारणाच्च सामाजिकशैक्षिकसाहित्यिकचारित्रिकरूपेण पतनं लक्षयति। तस्मादुपन्यासोऽयं समाजशिक्षासाहित्यचरित्रसंवर्धनाय सर्वथा समीचीनो युगानुरूपश्च वर्तते। अस्मादस्य उपन्यासस्य स्थानम् उपन्यासपरम्परायां मूर्धन्यमुत्कृष्टञ्च सिद्ध्यति।

उपन्यासस्य महत्त्वम्

प्रो.राधावल्लभत्रिपाठिना प्रणीतस्य 'विक्रमचरितम्' इत्युपन्यासस्य अनुशीलनेन विनयविनीतया मया कतिपयानि महत्त्वाधायीनि जीवनमूल्यावदानानि अधितानि। उपन्यासविधया संस्कृतसाहित्यकोशं पोषयन्नयमुपन्यासः राजनैतिकं सामाजिकं शैक्षणिकं साहित्यकञ्च महत्त्वमावहति।

राजनैतिकम् उपादेयत्वम्

अद्यत्वे दलितोद्धारनाम्ना यद् दलितानां शोषणं विखण्डनञ्च विधीयते, तदपि कवेः अवर्ण्यतां न गतः। कम्बुकण्ठशृगालः चतुरिका लोमशिका च कपटयोजनां निर्माय दलितेषु उच्चवर्गं प्रति विरोधाग्निं प्रज्वाल्य समाजे विघटनं जनयतः। कुटिलराजनीतेः अशोभा: छद्मप्रपञ्चाः स्वार्थसाधनानि, अनुचितरूपायैर्वित्तसञ्चयादिकं कविना युगसत्यानीमानि यथार्थरूपेण प्रतिपादितानि। नार्योऽपि स्वार्थान् पूरियतुम् अन्यं प्रवञ्चयन्ति, स्वार्थसाधनाय च परपुरूषाभिगमनमपि स्वीकुर्वन्ति।

एतस्माद् राजनीतिः छद्मप्रपञ्चविहीना परोपकाराय त्यागाय च स्यात्। समुचितसाधनोपायैः धनार्जनं करणीयम्। दलितानां शोषितानां च शिक्षासंस्कारपरिवेशनिर्माणैरुपायैः सर्वथा उत्थानं करणीयम्। यथायोग्यं पदञ्च जनाः लभेरन् जातिवर्ग-माध्यमेन न कश्चन समाजं भिन्द्यात्, सर्वे नेतारः सच्चरित्राः भवेयुः राजनीतिः प्रजानुरञ्जनाय स्यात्। राजनीतेः संरक्षणं पोषणमभिवध नञ्च राष्ट्रियमुपादेयत्वमावहति।

सामाजिकं महत्त्वम्

'विक्रमचरितम्' इति उपन्यासः समाजे परस्परं सद्भाव-समभाव-सौहार्द-समवेदना-सहयोगादीनि सामाजिकतत्त्वानि उपदिष्टानि। समाजे परस्परं सद्भावो वर्धेत, सामन्तैः निर्धनानां श्रमिकाणां च शोषणं न विधेयम्, तेषां शारीरिकदण्डादिभिः प्रताडनमपि न स्यात्, कृषकाणां वित्तीया अवस्था उत्थापनीया, नारीणां सम्मानो वर्धेत, दलितानाम् उन्नयनाय शिक्षणादिभिरुपायैः प्रयासाः विधेयाः, दलिताः न केनापि विधि ना प्रवञ्चिताः स्युः एतदपि अवधेयं भवेत्। समाजस्य उत्थानाय एतानि तत्त्वानि नितान्तमपेक्षितानि भवन्ति। एतेषां मूल्यतत्त्वानामाध नाद् उपन्यासोऽयं सामाजिकं महत्त्वमावहति।

शैक्षिकं महत्त्वम्

कस्यापि समाजस्य राष्ट्रस्य चोन्नतये शिक्षायाः विशिष्टं महत्त्वं भवति। शिक्षया संस्काराः जीवनमूल्यानि च पुष्यन्ते, शिक्षायामनुचितैः उपायैः उपाधयो नैव प्राप्तव्याः। लोकोन्नेयाः हितकराः च शोधविषयाः गवेषकेभ्यो गवेषणाय लम्भनीयाः। परिष्कारेण राष्ट्रस्य समाजस्य च परिष्कारो भवति। उपन्यासेऽस्मिन् शिक्षोपयोगीनि तत्त्वानि निरूपितानि, येनास्य शैक्षिकं महत्त्वमभिव्यज्यते।

साहित्यिकं महत्त्वम्

'हितेन सह इति सहितम्, तस्य भावः साहित्यम्' इति व्युपत्त्या साहित्यं राष्ट्राय समाजाय च हितकरं भवति। कवयः साहित्यकारा वा उच्चपदवाप्तये धनार्जनाय च चाटुकाव्यानि न विरचयेयुः। कवयः स्वकाव्यप्रतिभया गुणहीनस्य कस्यचिद्राज्ञो विशिष्टस्य गुणकीर्तनं न विदध्युः। राजानः अपि योग्यानां साहित्यकाराणां सम्मानं कुर्वन्तु। कस्यचन अपि राष्ट्रस्य समाजस्य जनस्य वा यथार्थं निरूपणं स्याद्येन तस्य काव्यस्य महत्त्वं वध ते।

'विक्रमचरितम्' इति उपन्यासस्य उपादेयतत्त्वानि एवास्य महत्त्वं साहित्यिकमहत्त्वं वर्धयन्ति। वर्तमानराजनीतिमाश्रित्य प्रणीतो बीभत्सरसप्रधानो निदर्शनाविधाऽऽश्रितोऽयमुपन्यासः संस्कृतोपन्यासवाङ्मयकोशं संवर्धयति। एष अखिलकाव्यतत्त्वसम्पदापूरितः राजनैतिक-सामाजिक-शैक्षिक-साहित्यिकतत्त्वविभवसम्पन्नः संस्कृतसाहित्ये मूर्धन्यं स्थानम् आप्नुवन् नितान्तमुपादेयत्वं महत्त्वञ्चावहति।

संदर्भ

1. संस्कृत साहित्य का इतिहास, डॉ.उमाशंकर ऋषि, पृ. सं. 372
2. राधावल्लभ की सारस्वत साधना पृ. सं. 91
3. अभिराजयशोभूषणम्, प्रो.राजेन्द्रमिश्र
4. अभिनवकाव्यालङ्कारसूत्रम्, 3.1.13
5. विक्रमचरितम्, पृ. सं. 1
6. विक्रमचरितम्, पृ. सं. 3
7. विक्रमचरितम्, पृ. सं. 22

तृतीयपुटस्य शेषभागः

# अमृतसञ्चयः

स्नानं जलैर्मन्त्रकृतैर्विधेयं
पन्था नवो नो जयसञ्चयार्थम्।। 10

सत्येन्द्रः- अरे सखायः! ग्राम्या जनाः बहुधा बोधिता अपि न तथा कुर्वन्ति येन सर्वेषां कल्याणं भवेत्। पश्यतु सर्वकारेण ग्रामेषु विद्युद्व्यवस्था साधु कृता। आदिनं व्यजनानि वायुं प्रयच्छन्ति। गृहे विद्युद्दीपा अपि प्रकाशं विकिरन्ति। आवश्यतामतिक्रम्यापि एते मम बन्धवः यत्र एकेन विद्युद्दीपेन कार्यं भवितुमर्हति तत्रापि विद्युद्दीपयुगलं नियोजयन्ति। प्रभाते विस्मरन्त्यपि। कदा एते जागरिता भविष्यन्ति?

चन्द्रकान्तः- सत्यं वदति मित्रमणिः। मम विचारेण एका जलसंरक्षणसमितिः कल्पनीया। यत्र ग्रामीणा एव भवन्तु सदस्याः। ते एव तान् बोधयन्तु ये प्रातः सायं वा व्यर्थं जलं प्रवाहयन्ति। यावता जलेन कार्यं सिद्धं भवेत् तावतैव कार्यं साधनीयम्।

अमरेन्द्रः- समीचीनो विचारो वर्तते भवतः। शुभस्य शीघ्रं। अद्यैव वयं संघटनं कुर्मः, येन अमृतसञ्चयो भवेत्। यतोहि अमृतमापः इति उपनिषद्वचनमपि वर्तते।

चन्द्रकान्तः- अद्यैव मध्याह्ने ग्रामदेवतास्थले अश्वत्थच्छायातले वयमुपविशामः। सूर्यातपक्लान्ता ग्रामीणा अपि विशालाश्वत्थच्छायामाश्रयन्ते प्रायशः। सुहृदः! अधुना गृहं गच्छामः। मध्याह्ने समयेन द्विवादने मिलामः।

(सर्वे प्रस्थिताः)

द्वितीयं दृश्यं समाप्तम्

तृतीयं दृश्यम्

(विशालः अश्वत्थः युगयुगाद् पूज्यमानः साम्प्रतं वार्धक्यं सेवते। किन्तु नवीनाः शाखा अस्य आगतान् रक्षन्ति। जीणशीणशरीरो*पि सन्नयं महर्षिवत् जलकल्याणाय सर्वथा समुत्थितो दृश्यते। अत्र प्रस्तरप्रसरो ग्राम्यैर्निर्मितो*स्ति। गोलाकारे महति प्रस्तरे मण्डलायमानाः ग्राम्यवृद्धा युवानश्च यथास्थानं समुपविष्टाः जलसंरक्षणाय चिन्तिता विलोक्यन्ते। अत्रान्तरे आयान्ति चन्द्रकान्तादयः।)

एको ग्रामीणः- आगच्छत पुत्रा! आगच्छत। समुपविशत। रक्षत ग्रामम्।

एते- सादरं सर्वान् वन्दामहे।

लोकनाथः- पुत्राः! जलसमस्याविषये युष्माकं चिन्तनं श्रुत्वा आनन्दिता वयम्। कथयत किं करणीयमस्ति?

चन्द्रकान्तः- पितृव्य! भवान् सम्यग्जानाति यत् भवतो*पि गृहे जलं दूरादेवायाति। एकं जलपात्रं विंशतिरूप्यैर्लभ्यते।

लोकनाथः - आं पुत्र! सत्यमाह। जलपात्रद्वयमानीयते प्रतिदिनम्। तेनापि पिपासिता इव तिष्ठामो वयम्। एतादृशी जलसमस्या अशीतिवर्षदेशीयेन मया नैव दृष्टा। अस्माकं युवकाले तु सरोवरजलमपि गोचारणसमये पेयं भवति स्म। अधुना किमिदं जातमस्ति।

रम्भा- पितृव्य! मध्ये वक्तुकामा क्षमां याचे। भवतु मानवानाम् अस्माकं कृत्यैरेजलेयमपि अपेयमस्ति संवृत्तम्। ग्रामसरोवराः शुष्काः, बहवस्तडागा लुप्ताश्च। येन जलस्तरो याति प्रतिपलं नीचैरिति।

कविता- एकमपरमपि कारणमस्ति। वयं मलिनं वस्त्रं पात्रमपि बहुजलेन क्षालयामः। अवकरान् जलाशये क्षिपामो येन तत्रत्यं पेयमपि जलमिदानीं विषाक्तमस्ति जातम्।

सुन्दरी- जलसंरक्षणसमितौ महिनामपि उत्तरदायित्वं निश्चीयेत, यतोहि महिला एव जलस्य गेहे सदुपयोगं दुरुपयोगं वा कुर्वन्ति।

(सर्वे तालिकां वादयन्ति।)

चन्द्रकान्तः- (उत्थाय) सभ्या मम ग्रामीणाः! भवतां विचाराः श्रुता एव। सत्यमेव साक्षात्क्रियते यत् जलसमस्या एका महती समस्या वर्तते, यदि समये अस्या उन्मूलनं न भविष्यति तदा महती क्षतिर्नूनमेव भविष्यति। पुराकाले अन्नसमस्या आसीत् किन्तु इदानीं जलसमस्या विवृतवदना भाययति। अस्माकं ग्रामप्रधानमहोदयो*पि वर्तते। वयं तन्मुखेनैव जलसमस्यानिदानोपचारं श्रोतुमिच्छामः।

ग्रामप्रधानः- (बद्धाञ्जलिः) अहं सविनयं वच्मि, यन्मम गृहे नैव मम पुत्रिका स्नानाय जलस्य दुरुपयोगं करोति। मदमत्तेन मम सेवकेन मम नाम्ना जलमादाय विक्रीयते। इति मया ज्ञातमस्ति। गृहान्निस्सारितो*यं जाल्मः। अहन्तु सपरिवारः ग्रामस्य सेवायै प्रस्तुतो*स्मि। एते ग्रामस्य रत्नकल्पाः चन्द्रकान्तादयः यदभिलषन्ति तत्सादरं स्वीक्रियताम्।

(ध्वनिरायाति, जयतु ग्रामप्रधानः जयतु ग्रामप्रधानः)

मंगलदेवः- पुत्र! चन्द्रकान्त! श्रावय नामानि जलसंरक्षणसमितौ ये त्वया चितास्तेषाम्।

चन्द्रकान्तः- पितृव्यमहोदय! विमलः जलसंरक्षणसमितेरध्यक्षः, सत्येन्द्रः महामन्त्री, रम्भा जलसंरक्षणसमितिसचिवपदस्था भवन्तु। भवतां सर्वेषामपि निर्देशने जलसंरक्षणसमितिरियं निरन्तरं कार्यं करिष्यति। यत्र कुत्रापि अस्माकं शैथिल्यं दृश्येत तत्र तत्र भवद्भिः अनुभवविभवैः अनुशासनीया वयम्।

योगेन्द्रः- समुचितं कथितम्। वयं निजग्रामोन्नतये सततमेव सहयोगं करिष्यामहे।

रूपसी- श्रृण्वन्तु श्रीमन्तः! अहं प्रातरेव सर्वेषां गृहं गत्वा जलसदुपयोगप्रशिक्षणं प्रदास्यामि। केन स्वल्पेन जलेन वस्त्रप्रक्षालनं पात्रप्रक्षालनं वा भवेदिति। मम शिक्षणं जलविषयकमेवास्ति।

विमलः- मान्याः कृषकाः! भवन्तो*पि कृषिवैज्ञानिकजनैस्साकं सम्यक् वार्ता कृत्वा जानन्तु यत् शस्यसेकप्रक्रिया केन प्रकारेण क्रियतां येन जलहानिर्न भवेत्।

चन्द्रकान्तः- यथोचितं परामृशति सखा विमलः। अवश्यमेव ध्यानं देयमस्माभिः। अस्माकं ग्रामे केचन जलशुद्धिकरणाय आरोयन्त्रं स्थापितवन्तस्सन्ति। तेषामस्ति स्वागतम्। किन्तु ग्रामे विशालं सर्वकारपक्षतः आरोयन्त्रमपि स्थापनीयं येन सर्वेषामपि गृहे पेयं जलं प्रतिदिनं गच्छेत्।

सत्येन्द्रः- पेयजलपानेन रोगा अपि नैव भविष्यन्ति। येन ग्रामीणामस्माकं धनमपि अन्यस्मिन् कार्ये व्ययीभविष्यति। अहो महति चातपे एतौ शैलेशारविन्दभ्रातरौ अत्रागच्छन्तौ दृष्टिपथमायातः। स्वागतं भवतोः।

शैलेशः- (सर्वान् प्रणमन्) महानुभावाः! हरिद्वारादिदानीमेवागतः यदा अमृतसञ्चयविषयकं समुवेशनमश्रौषं तदा मित्रेणारविन्देन साकं त्वरितमेव अनपसारितवस्त्रः समागतवानस्मि। आवयोः सर्वविधसहयोगो वर्तते।

अरविन्दः- मान्याः! विज्ञातविषयो*हं भवतां सर्वेषामपि हार्दिकं वर्धापनं प्रयच्छामि। एतादृशं कार्यमेव प्रशस्यतरं भवति। मानवकल्याणाय पुरा कालो धनाढ्या वापीकूपतडागसरोवरादिनिर्माणं कारयन्ति स्म। अधुना तु शिक्षिता विज्ञा वयं विपरीतमाचरामः। जानन्ति भवन्तः साद्र्धचतुस्सहस्रं नद्यः शुष्का विंशतिलंक्षपरिमिताः तडागाः विलुप्ता अगणिता निर्झरा कूपाश्च दिवंगताः। अमेरिका सर्वाधिकं वृष्टिजलं जलभाण्डारे सुरक्षितं स्थापयति। आस्ट्रेलिया चीन स्पेनादयो देशा अपि वर्षाजलसञ्चयं कुर्वन्त्येव। किन्तु अस्माकं देशे स्वल्पं वृष्टिजलमेव संगृह्यते। अस्मिन् विषये*पि चिन्तनीयमस्ति। ग्रामस्य शुष्का तडागा पुनरपि जलपूरिता भवन्तु। अतः तत्र मृत्तिकाखननमपि कार्यं येन गभीरे तडागे अधिकजलसञ्चयो भवेत्।

ब्रजविहारी- भवान् सत्यं कथयति। पंचनदप्रदेशे तु जलसंरक्षणाय सर्वकारो जागरितो वर्तते। सम्पूर्णे*पि पंचनदप्रदेशे पाइपमाध्येन गन्त्रीप्रक्षालनं गृहप्रक्षालनं वा सर्वथा निषिद्घमस्ति। य इमामाज्ञामुल्लङ्घयिष्यति स पंचसहस्रं रूप्याणि दण्डस्वरूपाणि प्रदास्यति।

सचिनः-वर्धापनमस्तु भवते। बहु सम्यगुक्तमेतत्। मयापि समाचारपत्रेण ज्ञातमिदमस्ति। तत्र तु पंचनदप्रदेशे उद्यानेषु वृक्षाः पंचवादनान्तरमेव सायंकाले सेक्तव्या इत्यपि निर्देशो दत्तो वर्तते। अस्माभिरपि जलसंरक्षणाय एतत्करणीयमस्ति। अन्यथा जीवनस्य प्राणतत्त्वमेव जलं न लप्स्यते।

सत्यदेवः- अये बन्धवः! श्रृण्वन्तु जलमेव जीवनमस्ति। अतएव अमृतमुच्यते। श्रुतमेव सर्वमधुना जलसमस्याविषयकं वृत्तम्। अतः नैव प्रक्षालने स्नाने सेके वा जलस्य दुरुपयोगो विधेयः। अहन्तु समुद्घोषयामि यद् ये जलाशया ग्रामे सन्ति तेषां स्वच्छताभारो मयि निक्षिप्यताम्। अहमन्यैस्साकं शीघ्रमेव जलस्वच्छताभियानम् अग्रे सारयिष्यामि। यो जलाशये कूपे वा अवकरं क्षेप्स्यति, असौ दण्ड्यो भविष्यति।

ग्रामप्रधानः- (स्वस्थानादुत्थाय) साधुवादो भवते सत्यदेवाय। चन्द्रकान्तादयो युवानः! भवतां कार्यं श्लाघनीयमस्ति। सर्वे अमृतसञ्चयार्थं यथाशक्ति यतन्ताम्। मम पुत्रिका जलसंरक्षणार्थं जीवनमर्पितवती वर्तते। अस्या मार्गदर्शनं कुर्वाणा वयम् अमृतसञ्चयं करिष्यामहे, येन अस्माकम् भाविशिशवो न वदेयुर्यत् जलं न संरक्षितं पूर्वजैरिति।

(ततः सुन्दरी किञ्चिदग्रे आगत्य रम्भाहस्तं स्वहस्तेन कर्षयन्ती सर्वान् विलोकयन्ती गायति।)

भरतवाक्यम्

ग्रामेषु शुद्धसलिलं प्रवहेत् प्रपेयं
स्वस्था निपीय निखिला जनता भवेच्च।
अश्वत्थदेवसविधे शपथं गृहीत्वा
यामो वयं सपदि चामृतसञ्चयाय।। 11

# भगवति ! सुरकण्डेह्यसुरनाशिनि !

प्रोत्तुङ्गहिमश्रृङ्गस्थितायाः भगवत्याः सुरकण्डादेव्यास्समर्चनायां गीतमेकमक्षिलक्ष्यीक्रियते तावदिदानीम्भवतामानन्दसन्दोहसंवर्द्धनाय-

भगवति ! सुरकण्डेह्यसुरनाशिनि !
सुतमुद्धारय धारय भक्तिं शुचिहिमशैलविलासिनि !!

शिवविग्रहकल्पे सानौ विलसनशीले पूते !
जगदीश्वरि ! देवीश्वरि ! नित्ये ! सकलकलाभूते !
विश्वालम्बयुते जगदम्बे ! सदा त्वां याचे
मामुपेहि सस्नेहमहो विनयेन मयाह्यह्यहूते !
कर्षोत्कर्षहेतवे मामिह मातर्भावविकासिनि !
भगवति ! सुरकण्डेह्यसुरनाशिनि !

शैलशीलमनुशीलयसि त्वं देवि नभसि नीले,
लोकञ्चालोकयितुमहरहो यतसे सच्छीले,
तुङ्गश्रृङ्गमास्थाय कथं किल लोका वर्तेरन्
निरहङ्कारशिक्षणं कुरुषे सततं श्रीलीले !
मन्दस्मितसितविकसितवदने भुवमव सुखप्रकाशिनि !
भगवति ! सुरकण्डेह्यसुरनाशिनि !

त्वया दण्डिताश्चण्डमुण्डराक्षसाः श्रूयते लोके,
धर्मस्थापनाय तत्सर्वं कृतमिह शोकेह्यशोके,
साहित्येह्यपि साम्प्रतं नैके दैत्याः किल विचरन्ति
रक्ष रक्ष मातर्हिततहेतुं साधकशोकविमोके !
शब्दब्रह्मरक्षणे ख्यापय शस्त्रास्त्राणि सुहासिनि !
भगवति ! सुरकण्डेह्यसुरनाशिनि !

-डॉ0 रामविनय सिंहः, देहरादूनम्

प्रथमपुटस्य शेषभागः

# काव्यसृजनमहिलामंचमाध्यमेन्

सरस्वत्याः वन्दनया अभवत्। अतिथिनां स्वागतानन्तरं संस्थायाः अध्यक्षा डॉ. संगीताशर्मा काव्यसृजनमहिलामंचस्य परिचयं दत्तवत्ती। सांस्कृतिककार्यक्रमे प्रसिद्धकाव्यनृत्यांगना ज्योति व नीलम माध्यमेन् नृत्य एवं नदिनीशर्मा माध्यमेन गायनस्य प्रस्तुतिमभवत्। अस्मिन्नवसरे पत्रकारिता, साहित्य, सामाजिक, चिकित्सा एवं पर्यावरणस्य च क्षेत्रे उपलब्धिं प्राप्त जनान् अपि संस्था सम्मानितवान्। कार्यक्रमस्यान्ते अन्तिमसत्रे काव्यगोष्ठ्यायोजनमभवत् येषु देहली एवं अन्यमण्डलस्यापि कवयः स्वप्रस्तुतिं प्रस्तुतवन्तः। कार्यक्रमे विशिष्टातिथि जानकीदेवीमहाविद्यालयस्य प्राचार्या कवयित्रि डॉ. सुधाउपाध्याय, निर्मातानिर्देशिका जे.वी.मनीषावजाज, सेवानिवृत्त आइ.ए.एस रामकिशोरउपाध्यायः श्रीकिशोरश्रीवास्तव, गीतकारः जयसिंहआर्यः, प्रवीणआर्यः, श्रीओमप्रकाशप्रजापति एवं श्रीगोविन्दपँवारस्य उपस्थितिः गरिमामयी आसीत्। मंचसंचालनं सुश्रीकनुप्रिया, अनुप्रिया, चित्राचक्रवर्ती, भावनाशर्मा इत्यादयः कृतवत्यः। कार्यक्रमस्य समापने अध्यक्षा संगीताशर्मा सर्वेषां अतिथिनां स्वागतं कृतवती।

**पाठकानां कृते सूचनाः-**

**कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुं पञ्चवार्षिकशुल्कं रु ६००/- ( संस्थादीनां कृते ) द्विवार्षिकशुल्क रु. २४०/- ( व्यक्तीनां कृते ) मनिऑर्डरः, चैकः ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां ( A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्-**

**Sanskrit samvad,**

**Current A/C No. 22490200000142,**

**Indian Overseas Bank, Yamuna Vihar, Delhi-110053**

**IFC Code- IOBA0002249**



# 'मनोगतम्' - 2.01

## प्रसारण-तिथिः - 30-6-2019



-संस्कृत-भाषान्तरं
द्वारा- डॉ.बलदेवानन्द सागरः
Cell- 9810 5622 77
Email - baldevanand.sagar@gmail.com

मम प्रियाः देशवासिनः, नमस्कारः। दीर्घान्तरालानन्तरं, पुनरेकवारं, भवतां सर्वेषां मध्ये, 'मन की बात'-मनोगतम्,जन-वृत्तम्, प्रत्येकमपि जनस्य मनोगतम्, जन-मनोगतम्'- अस्य सातत्यं वयं प्रारभामहे । प्रपञ्च-बहुलेषु निर्वाचनेषु, सत्यपि कार्यबाहुल्ये, 'मन की बात'-इत्यस्य प्रसार्य-कार्यक्रमस्य यः आनन्दः अस्ति, सः विलुप्तः आसीत् । किञ्चित् नैयून्यम् अनुभवामि स्म । आत्मीयानां मध्ये उपविश्य, सुखदे निर्भरे च परिवेशे, त्रिंशदुत्तर-शत-कोटि-देशवासिनां कुटुम्बस्य सर्वे स्वजनरूपेण, नैक-कथाः शृण्वन्तः, ताश्च पुनरावर्त्तयन्तः भवन्तः स्मः, कदाचित्तु स्वीयानि एव वृत्तानि, स्वजनानां कृते प्रेरणादायीनि भवन्ति स्म । भवन्तः कल्पयितुं शक्नुवन्ति यद् अयं मध्यगतः कालखण्डः प्रयातः, सः केन प्रकारेण प्रयातः स्यात् । रविवासरः, मासस्य अन्तिम-रविवासरः ङ्क एकादश-वादने, ममापि प्रतीयते स्म यद् अहो, किञ्चित् न्यूनायते इतिङ्क मन्ये, भवन्तोह्यपि अनुभवन्ति स्म, नूनं,किमेवं वा ?। कदाचिदयं, न कश्चन निर्जीवः कार्यक्रमः आसीत्। कार्यकमेह्यस्मिन् जीवत्वम्, आत्मीयत्वम्, मनसः चानुरक्तिः आसन्, हृदयानाम् संसक्तिः आसीत्, अथ च, एतस्मादेव कारणात्, यः मध्यगतान्तरालःअवर्तत, सः मम कृतेह्यतितरां कठिनः आसीत्। प्रतिपलमहं किञ्चित् न्यूनम् अनुभवन्नासम्, तथा च, यदाहं' मनोगतं' प्रसारयामि तदा, भवतु नाम, वदाम्यहं, कदाचित् शब्दाः मामकीनाः,स्वरः मामकीनः, परञ्च, कथात्र भवदीया, पुरुषार्थः भवदीयः, पराक्रमश्च भवताम्। अहन्तु केवलं, मम शब्दानां, मामकीनायाः च गिरः उपयोगं कुर्वन्नासम्, एतस्मादेव कारणात् नैनं कार्यक्रमं परञ्च भवतां सर्वेषाम् अभावं काञ्चित् शून्यतां चानुभवन् आसम्। एकवारं तु मनसि समापन्नं यन्निर्वाचन-समाप्तेः अनुपदं, सत्वरमेव भवत्सु समुपस्थितो भवेयम्। परञ्च पुनः चिन्तितवान्ङ्कन हि,सः रविवासरीयः क्रमः सन्धारितः स्यात् । किन्तु अमुना रविवासरेण दीर्घा प्रतीक्षा कारिता।अस्तु, अन्ततः अवसरोह्ययं लब्धः एव । एकस्मिन् पारिवारिके परिवेशे 'मनोगतम्', हि लघु-लघु, सरलं तरलं च वृत्तं, समाजे जीवने च, यत् परिवर्तनस्य कारणं भवति, एकतः तस्येदं सातत्यं, कश्चिद् नूतनमेव भावम् उत्पादयत्, अपरतश्च नवीनस्य भारतस्य भावनां समर्थयत् सातत्यमिदं अग्रेसरेत्। अनेके सन्देशाः विगतेषु कतिपय-मासेषु अधिगताः येषु जनाः अकथयन् यत् ते,'मन की बात'-इति प्रसारणस्य अभावम् अनुभवन्ति। यदाहम् एतान् सन्देशान् पठामि, शृणोमि च - एते मां प्रीणयन्ति। सुतराम् आत्मीयताम् अनुभवामि। कदाचित्तु दृढमिदं प्रतीयते यत् एषास्ति मदीया स्व-तः समष्टिं प्रति यात्रा। एषा मम,अहम्-तःवयम्-यावत् यात्रास्ति। मदर्थन्तु भवद्भिः सह ममाह्ययं मूक-संवादः एकतः मदीयायाः आध्यात्मिक-यात्रायाः अनुभूतेः अपि अंशः आसीत्। निर्वाचनानां व्यग्रतावसरे कथमहं, केदारनाथम् अगच्छम् इतिकेचनतु अनेकान् प्रश्नान् अपृच्छन्। भवताम् अधिकारोह्यस्ति, भवतां जिज्ञासामपि अवगन्तुं पारयामि, तथा चाहमपि अनुभवामि यत् मदीयान् तान् भावान् भवतां समक्षं कदाचित् उपस्थापयिष्यामि, परञ्च, अद्यत्वेह्यनुभवामि यत् अस्यां दिशि यदि चलिष्यामि चेत्, तदा कदाचित् 'मन की बात'-इत्यस्य रूपमेव परिवर्तिता, अत एव निर्वाचनानांव्यग्रतायां सत्यां, जय-पराजययोः सत्यपि चानुमाने, इतः परमपि मतदानम् अवशिष्टमासीत्, अहञ्च केदारनाथं प्रति प्रस्थितवान्। जनानाम् अधिसंख्यम् अत्रापि राजनीतिकम् अर्थम् अन्वेषयत्। मदर्थन्तु, स्वेन साकं मेलनस्य सः अवसरः अवर्तत। एकतः, अहम् मामेव मेलितुं प्रस्थितः आसम्। साम्प्रतं नाहं विस्तरेण कथयिष्यामि, परञ्च एतावत्तु अवश्यं सूचयामि यत् 'मन की बात'-इत्यस्य अल्पविरामस्य कारणात् या शून्यता अनुभूतासीत्, केदारोपत्यकायां, तस्यां एकान्त-कन्दरायां, कदाचित् तया किञ्चित् सम्पूरयितुम् अवसरः नूनं प्रदत्तः। शेषन्तु, भवतां जिज्ञासास्ति-विचारयामि यत् कदाचित् तामपि चर्चिष्यामि। कदा करिष्यामि- तत् कथयितुं नैव पारयामि, किन्तु करिष्यामिअवश्यमेव, यतो हि भवन्तः मयि अधिकुर्वन्ति। यथा केदार-विषये जनाः जिज्ञासितवन्तः, तथैव भवतां कथनेषु रचनात्मक-विषयान् सबलं समुपस्थापयितुं विधीयमानान् प्रयासान् सततम् अनुभवामि। 'मन की बात'-कार्यक्रमार्थं यानि पत्राणि आयान्ति, ये विनिवेश्याः विचाराः प्राप्यन्ते, ते दैनन्दिनेभ्यः सर्वकारीय-कार्येभ्यः नितरां भिन्नाः भवन्ति। अन्यतर-प्रकारेण भवतां पत्राण्यपि मम कृते कदाचित् प्रेरणा-कारणानि भवन्ति, कदाचिच्च ऊर्जायाः कारणानि सञ्जायन्ते। कदाचित्तु भवतां केचन शब्दाः एव,मम विचार-प्रक्रियां तीव्रां विधातुं प्रभवन्ति। जनाः, देशस्य समाजस्य च समक्षं स्थितानि समाह्वनानि उपस्थापयन्ति, युगपदेव समाधानानि अपि परामर्शयन्ति। मयावलोकितं यत् पत्रेषु जनाः समस्यास्तु वर्णयन्ति एव, परञ्च इदमपि अत्र वैशिष्ट्यं यत् युगपदेवते, प्रत्यक्षतो वा परोक्षतयासमाधानानि अपि, काञ्श्चन परामर्शान्, काञ्चित् कल्पनां च प्रकटयन्ति। यदि कश्चन स्वच्छता-हेतोः लिखति, तर्हि अस्वच्छतां प्रति स्वीयं रोषं तु प्रकटयत्येव, किञ्च स्वच्छतायाः प्रयासान् अपि प्रशंसति। कश्चन पर्यावरणस्य चर्चां करोति, तदा तस्य पीडा तु अनुभूयते, किन्तु युगपदेव, तेन स्वयं ये प्रयोगाः विहिताः, तान् अपि असौ सूचयति - तथा च,याः कल्पनाः तस्य मनसि वर्तन्ते ताश्चापि असौ चित्रयति। अर्थात् अन्यतम-प्रकारेण समस्यानां समाधानं समाजव्यापकं केन प्रकारेण स्यात्- एतादृशीम् ईक्षां भवतां सन्देशेषु नूनमहम् अनुभवामि। 'मन की बात'-इति प्रसारणं देशस्य समाजस्य च कृते मुकुरवत् वर्तते। इदम् अस्मान् निर्दिशति यत् देशवासिनाम् आन्तरिकी दृढता, शक्तिः प्रज्ञा च प्रतिभा च, तत्र न किञ्चिदपि नैयून्यम्। आवश्यकतास्ति, अस्याः दृढतायाः प्रज्ञायाः च समन्वयस्य, आभ्याम् अवसर-प्रदानस्य, अनयोः कार्यान्वयनस्य च। 'मन की बात'-कार्यक्रमः इदमपि द्योतयति यत् देशस्य उन्नत्या, त्रिंशदधिक-शतकोटि-मिताःदेशवासिनः दृढतया सक्रियञ्च आत्मानं संयोजयितुम् अभिलषन्ति, तथा चाहं तथ्यमेकं नूनं स्थापयामि यत् 'मन की बात'-प्रसारणस्य प्रत्युत्तरे एतावन्ति पत्राणि प्राप्नोमि,एतावन्तो दूरभाषाः अधिगम्यन्ते, एतावन्तश्च सन्देशाः प्राप्यन्ते, किन्तु एतेषु परिदेवन-तत्वम् अतितरां न्यूनं भवति, तथा च, केनचित् किञ्चित् याचितं भवेत्, आत्मनः कृते वा याचितं स्यादिति, नैतादृशं अन्यतममपि वृत्तं, विगतेषु पञ्च-वर्षेषु, मया कदाचिद् अवगतम्। भवन्तः कल्पयितुं शक्नुवन्ति, देशस्य प्रधानमन्त्रिणं प्रति कश्चन पत्रं लिखेत्, तथा चात्मनः कृते न किञ्चिदपि याचेत, चेत् देशस्य कोटि-कोटि-जनानां भावनाः कियत्यः उच्छ्रिताः भवेयुः ? यदाहं एतत्-सर्वं विश्लेषयामिङ्क भवन्तः किंकल्पयितुं शक्नुवन्ति ? मम हृदयं कियन्तं परमम् आनन्दम् अनुभवति ? कियन्तीमूर्जां चावाप्नुवन्नस्मि ? भवन्तः कल्पयितुं नैव शक्ष्यन्ति यत् भवन्तः एव मां चालयन्ति, भवन्तो मां धावयन्ति, भवन्तो मां प्रतिपलं प्राणवन्तं कुर्वन्तः सन्ति, एवं हि अयमेव सम्बन्धः यत्र काञ्चित् न्यूनताम् अनुभवन्नासम्। अद्याहम् अतितरां प्रसन्नोह्यस्मि। यदाहम् अन्तिमावसरे अकथयम् यत् त्रि-चतुर्मासानन्तरं वयं मेलिष्यामः, तदा जनाः अस्य वक्तव्यस्यापि राजनीतिकार्थं ख्यापितवन्तः निगदितवन्तश्च यत् अहो ! मोदि-महोदयः कियान् विश्वस्तः, कियान् च प्रत्ययान्वितः। विश्वासोह्ययं मोदिनः न मनागपि आसीत् - अयं विश्वासः, भवतां सर्वेषां विश्वासस्य आधारः आसीत्। भवन्तः एव आसन्, ये हि विश्वासरूपं धृतवन्तः, एतस्मात् कारणात् सहजरूपेण अन्तिमे 'मन की बात'-प्रसारणे मया उक्तं यत् केषाञ्चन मासानाम् अनन्तरं, पुनरहं भवतः पार्श्वे आगमिष्यामि। वस्तुतस्तु, नाहम् आगतवान् ङ्क भवन्तो माम् आनीतवन्तः, भवन्तः एव माम् आरोहितवन्तः, तथा च भवन्तः एव मह्यं पुनरेकवारं प्रसारणस्य अवसरमिमं प्रदत्तवन्तः। अनया भावनया साकमेव, आगच्छन्तु,'मन की बात'-इत्यस्य सातत्यम् अग्रेसारयेम।

यदादेशे आपातकालः प्रवर्तितः, तदा तस्य विरोधः केवलं राजनीतिक-वर्तुलेषु एव सीमितः नासीत्, राजनेतृषु एव सीमितः नासीत्, काराणां द्वाराणि यावदेव, आन्दोलनं सीमितं नैवाभवत्। प्रत्येकमपि जनस्य हृदये आक्रोशः प्रावर्तत। विलुप्तस्य लोकतन्त्रस्य गहना वेदनासीत्। अहर्निशं यदा समयानुसारं भोजनं कुर्मः तदा किं नाम भवति क्षुधा-इति अवगन्तुं नैव शक्नुमः, एवमेव सामान्य-जीवने लोकतन्त्रस्य अधिकाराणाम् आनन्दः कीदृशो भवति ? तत्तु तदावगन्तुं पार्यते यदा कश्चन लोकतान्त्रिकान् अधिकारान् आच्छिनत्ति। आपातकाले, देशस्य प्रत्येकमपि नागरिकः अनुभवति स्म यत् तस्य किञ्चित् बलाद् अपहृतमिति। यस्योपयोगं सः जीवने न कदापि अकरोत् सोह्यपि अपहृतश्चेत् तदा तस्य पीडा तद्-हृदये आसीत्, इदं हि तस्मात् कारणात् नैवासीत् यत् भारतस्य सम्विधानं किञ्चित् व्यवस्थापितवत्, यस्य कारणात् लोकतन्त्रमिदं विकसितम्। समाज-व्यवस्थामिमां प्रचालयितुं, सम्विधानस्यापि आवश्यकता भवति, विधीनां, नियमानां चापि आवश्यकतावर्तते, अधिकारस्य कर्तव्यस्यापि कथा प्रवर्तते किन्तुभारतंगर्वेण वक्तुं शक्नोति यत् अस्माकं कृते, विधि-नियमेभ्यः अधिकतरं हि लोकतन्त्रम् अस्मदीयेषु संस्कारेषु वर्तते, लोकतन्त्रं नाम अस्मदीया संस्कृतिः, लोकतन्त्रं हि अस्मदीयं रिक्थम्,तद्-रिक्थम् आलम्ब्य वयं पुष्टाः वृद्धिं चापन्नाः जनाः स्मः, अत एव तस्य न्यूनतां देशवासिनः अनुभवन्ति, तथा च आपातकाले वयम् अनुभूतवन्तः, तस्मादेव देशः, आत्मनः कृते नैव, निज-हितार्थञ्च नैव, लोकतन्त्रस्य रक्षार्थं पूर्णमपि निर्वाचनमेकं आहूतवन्तः। जगति कदाचित्, विश्वस्य केनचित् देशेन, तत्रत्यैः प्रत्येकमपि जनैः, लोकतन्त्रस्य कृते, स्वीयानाम् अवशिष्टानाम् अधिकाराणां, आवश्यकतानां चिन्तां नैव कृत्वा, केवलंलोकतन्त्रस्य कृते मतदानं कृतं स्यात्, एतादृशमेकं निर्वाचनं, देशेह्यस्मिन् विगते सप्त-सप्ततितमे वर्षे अवालोकितम्। नातिचिरं लोकतन्त्रस्य महापर्व, बृहत्तमं निर्वाचनाभियानं, अस्मदीये देशे सम्पन्नम्। समृद्धाः निर्धनाः - सर्वेह्यपि च नागरिकाः, अस्मिन् पर्वणि सानन्दम् अस्माकं देशस्य भावि-निर्णयार्थं तत्पराः आसन्।

यदा किञ्चित् वस्तुजातम् अस्माकं सन्निकटे भवति तदा वयं तस्य महत्त्वम् अल्पीकुर्मः, तस्य आश्चर्यकराणि तथ्यानि अपि उपेक्षितानि भवन्ति। बहुमूल्यं यल्लोकतन्त्रं वयं प्राप्तवन्तः, तं वयम् अतिसरलतयामन्यामहे किन्तु अस्माभिः, आत्मनः स्मारणं सततं कुर्वद्भिः स्थातव्यं यत् अस्मदीयं लोकतन्त्रम् अतितरां महदस्ति, तथा च, लोकतन्त्रमिदं अस्मदीयासु नाडीषु प्रतिष्ठितं वर्तते- शताब्दीयया साधनया, प्रतिवंशं प्रवर्तमानैः संस्कारैः, एकस्यविशालस्यव्यापकस्य चमनसः अवस्थया । भारते,एकोनविंशत्युत्तर-द्विसहस्रतमे वर्षे लोकसभा-निर्वाचनेषु, एकषष्टि-कोट्यधिकाः जनाः मतदानं कृतवन्तः, एकषष्टि-कोटिमिताः ! आपाततः संख्या एषा अतितरां सामान्या प्रतीयते किन्तु जगतोह्यनुसारं यदि कथयेयं चेत्, चीन-देशमतिरिच्य, जगति कस्यापि देशस्य नागरिकेभ्यः अधिकतरैः जनैः मतदानं विहितम्। यावन्तो मतदातारः ऐषमः लोकसभा-निर्वाचनेषु मतदानं कृतवन्तः, तेषां संख्याअमेरिका-देशस्य आहत्य जनसंख्यायाः अपेक्षया अधिकतरा वर्तते, प्रायेण द्विगुणितास्ति। भारते आहत्य मतदातर्णिां यावती संख्यास्ति, सा समग्र-यूरोपस्य जनसंख्यापेक्षया अधिकास्ति। इयम् अस्माकं लोकतन्त्रस्य विशालतायाः व्यापकतायाः चाभिज्ञानं कारयति। एकोनविंशत्युत्तर-द्विसहस्रतमे वर्षे सम्पन्नानि लोकसभा-निर्वाचनानि अधुनावधि-पर्यन्तम् इतिहासे जगतः बृहत्तमं लोकतान्त्रिक-निर्वाचनमासीत्। भवन्तः कल्पयितुं शक्नुवन्ति, एतत्-प्रकारकस्य निर्वाचनस्य कार्यान्वयनार्थं कीदृशानां बृहत्-स्तरीयाणां संसाधनानां मानवशक्तेश्च आवश्यकता अभविष्यत् । लक्षशः शिक्षकाणाम्, अधिकारिणां कर्मचारिणां चाहर्निशं श्रमेण निर्वाचनमिदं सम्पन्नम्। लोकतन्त्रस्य महायज्ञमिमं सफलता-पुरस्सरं निष्पादयितुं यत्र अर्द्धसैनिक-बलानां सुरक्षाकर्मिणां प्रायेण त्रिलक्षं निज-दायित्वं निभालितवत्, तत्रैव विभिन्नानां राज्यानां प्रायेण विंशति-लक्षं रक्षि-कार्मिकाः अपि, परिश्रमस्य पराकाष्ठामाचरितवन्तः। एतेषां कठोर-परिश्रम-कारणादेव विगत-क्रमापेक्षया ऐषमः क्रमे अधिकतरंमतदानं जातम्। मतदानार्थम् अशेष-देशे प्रायेण दश-लक्षं मतदान-केन्द्राणि, प्रायेण चत्वारिंशल्लक्षाधिकानिईवीएम्-इति वैद्युदाणविक-मतदान-यन्त्राणि, सप्तदश-लक्षाधिकानि वीवीपैट्- इति मतदातृ-प्रमाणीकरण-लेखापत्र-यन्त्राणि ! किं भवन्तः कल्पयितुं शक्नुवन्ति यत् कियती बृहती विशाला च सन्नद्धता ! एतत्-सर्वं तस्मादेव कारणात् अनुष्ठितं, येन सुनिश्चितमिदं स्यात्, यत् नैकोह्यपि मतदाता नैज-मताधिकारात् वञ्चितो भवेत्। अरुणाचल-प्रदेशस्य अन्यतरस्मिन् विजने क्षेत्रे, केवलम् एकस्मै महिला-मतदात्रे मतदान-केन्द्रं स्थापितम्। एतज्-ज्ञात्वा भवन्तः आश्चर्यम् अनुभविष्यन्ति यत् निर्वाचनायोगस्य अधिकारिणः तत्र प्रापणार्थं दिवस-द्वयात्मिकां यात्रां विहितवन्तः - इदमेवास्ति - लोकतन्त्रस्य यथार्थं सम्माननम्। जगति सर्वाधिके उच्छ्रितेस्थानेस्थितंमतदान-केन्द्रमपि भारते एवास्ति। मतदान-केन्द्रमिदं हिमाचल-प्रदेशे लाहौल-स्फीति-क्षेत्रे पञ्चदश-सहस्र-फीट्-मितोच्छ्रिते स्थाने स्थितं वर्तते । एतदतिरिच्य, निर्वाचनेह्यस्मिन् गर्व-सम्भरितम् अपरमेकं तथ्यमपि अस्ति। कदाचित्,इतिहासे प्रप्रथममेव घटितं यत् महिलाः पुरुषान् इवैव सोत्साहं मतदानमकुर्वन्। निर्वाचनेह्यस्मिन् महिलानां पुरुषाणा- ञ्च मतदान-प्रतिशतं प्रायेण समानमेवासीत्। अमुना सम्बद्धम् अपरमेकम् उत्साह-वर्धकं तथ्यमिदमेव यत् साम्प्रतं संसदि अष्ट-सप्ततिः महिला-सांसदाः सन्ति। निर्वाचनायोगं, निर्वाचन-प्रक्रियया सम्बद्धं प्रत्येकमपि जनं, भूयो भूयः वर्धापयामि तथा च भारतस्य जागरूकान् मतदातर्नि् नमामि।

मम प्रियाः देशवासिनः, भवन्तः अनेकवारं मम मुखात् श्रुतवन्तः स्युः, 'पुष्पगुच्छः नैव, पुस्तकम्', ममाग्रहः आसीत् यत् किं वयं स्वागत-सत्कार-विधौ पुष्प-प्रयोगापेक्षया पुस्तकानि प्रदातुं शक्नुमः ? ततः प्रभृति अनेकेषु स्थलेषु जनाः पुस्तकानि उपाहर्तुमारभन्त। नातिचिरं कश्चन मह्यं 'प्रेमचंद की लोकप्रिय कहानियाँ'- इति पुस्तकं प्रादात्। मह्यमिदम् अरोचत। यद्यपि, नाधिकः कालो लब्धः, किन्तु प्रवासावधौ तस्य काश्चन कथाः पुनः पठितुमहम् अवसरं लब्धवान्। प्रेमचंदेन स्वीय-कथासु समाजस्य यत् यथार्थं चित्रणं कृतं,पठनावसरे तस्य छविः भवतः मनसि विरचितुमारभते। तेन लिखितं प्रत्येकमपि घटना-वृत्तं जीवदिव प्रतीयते। सहजया, सरलया च भाषया मानवीय-संवेदनाः अभिव्यञ्जयन्त्यः तस्य कथाः मम मानसमपि मार्मिकतया अस्पृशन्। तस्य कथासु समग्र-भारतस्य मनोभावः समाहितोह्यस्ति। यदाहं तेन लिखितां 'नशा'-इति कथां पठन्नासं, तदा मम मनः स्वयमेव समाजे व्याप्ताम् आर्थिक-विषमताम् आलक्ष्य विचारपूर्णमभवत् । स्वीय-युवावस्थायाः दिनानि मम स्मृति-पथि आगतानि यत् केन प्रकारेण विषयमेनम् आधृत्य आनिशं परिचर्चा

प्रवर्तते स्म। भूमिपतेः पुत्रस्य ईश्वरी-त्यस्य निर्धन-कुटुम्बस्य 'बीर'स्य चेयं कथा शिक्षयति यत् भवान् यदि सावधानं नास्ति चेत्,दुर्जन-सङ्गतेः प्रभावः कदा जनं प्रभावयतीति अवगन्तुं नैव पार्यते। अपरा कथा, या हि मम हृदयं गभीरतया अस्पृशत्, सास्ति-'ईदगाह'-इति, एकस्य बालकस्य संवेदनशीलता, स्वीय-पितामह्याः कृते तस्य विशुद्धं प्रेम, एतावति लघु-वयसि एतावान् परिपक्वः भावः। चतुः-पञ्च-वर्षीयः हामिदः यदा मेलातः शङ्कुलामादाय स्वीय-पितामह्याः पार्श्वे आगच्छति तदा, वस्तुतस्तु, मानवीय-संवेदना स्वीय-चरमोत्कर्षं प्राप्नोति। अस्याः कथायाः अन्तिमा पङ्क्तिः अतितरां भाव-प्रधाना वर्तते यतो हि तस्यां जीवनस्य परमं यथार्थं सन्निहितमस्ति, - 'बच्चे हामिद ने बढ़े हामिद का पार्ट खेला था- बुढ़िया अमीना, बालिका अमीना बन गई थी।'

एतादृशी एव सुतरां मार्मिका कथास्ति -'पूस की रात'। अस्यां कथायां एकस्य निर्धन-कृषकस्य जीवनस्य विडम्बनायाः सजीव-चित्रणमवलोकयितुं शक्यते। स्वीय-शस्ये नष्टे सत्यपि हल्दू-कृषकः तदर्थं प्रसन्नो भवति, यतो हि इतः परं न तेन शैत्यातिशये काले क्षेत्रे शयनीयमिति। यद्यपि एताः कथाः प्रायेण शताब्द-प्राचीनाः सन्ति किन्तु आसां प्रासङ्गिकता, अद्यापि तावती एव अनुभूयते। आसां पठनानन्तरं, मयि एका पृथक्-प्रकारिका अनुभूतिः समुत्पन्ना।

यदा पठनस्य प्रसङ्गः प्रवर्तते, तदाहं उल्लेखितुं वाञ्छामि यत् कदाचित् कस्मिन्चित् सञ्चार-माध्यमे, केरलस्य अक्षरा-पुस्तकालय-विषयेऽहं पठन्नासम् । एतद् ज्ञात्वा भवन्तः आश्चर्यमनुभविष्यन्ति यत् पुस्तकालयोऽयं इडुक्की-(Idukki)-स्थलस्य सघनारण्येषु स्थिते एकस्मिन् ग्रामे वर्तते। अत्रत्यस्य प्राथमिक-विद्यालयस्य शिक्षकः पी.के.मुरलीधरन्, तथा लघु-चायापणस्य सञ्चालकः पी.वी.चिन्नाथम्पी, - इत्येतौ,एतत्-पुस्तकालयस्य कृते अनारतं परिश्रमं कृतवन्तौ। कदाचित् एवमपि आसीत्, यदा पोटलिकायां स्थापयित्वा निज-पृष्ठोपरि नीत्वा च पुस्तकानि अत्र आनीतानि। सम्प्रति अयं पुस्तकालयः, आदिवासि-बालैः साकमेव प्रत्येकमपि जनं अभिनवं पन्थानं प्रदर्शयति।

गुजरात-राज्ये 'वांचे गुजरात'-इत्यभियानमेकः सफल-प्रयोगः सिद्धः। लक्षशो जनाः प्रत्येकमपि वयोवर्गीयाः जनाः पुस्तकानां पठनस्यास्मिन् अभियाने सहभागित्वं निर्व्यूढवन्तः। अधुनातने digital-इति अङ्कीय-जगति, Google-गुरोः काले,अहं भवतोऽपि साग्रहं कथयामि यत् किञ्चित् कालं स्वीये दैनन्दिने व्यवहारे संरक्ष्य भवन्तः पुस्तकानां पठनं नूनं कुर्युः इति। अवश्यमेव भवन्तः आनन्दम् अनुभविष्यन्ति। तथा च, यत्किमपि पुस्तकं भवान् पठति, तद्विषये NarendraModi App-इत्यत्र अवश्यं लिखतु येन 'मन की बात'-श्रोतारः अपि तद्विषये ज्ञातुं शक्ष्यन्ति।

मम प्रियाः देशवासिनः, प्रसीदामितरां यद् अस्माकं देशस्य नागरिकाः तान् विषयान् आश्रित्यापि विचारयन्ति, ये न केवलं वर्तमानस्य, अपितु भविष्यस्य कृतेऽपि महत्-समाह्वानत्वेन वर्तन्ते। अहं NarendraModi App-Mygov-चेत्यत्र भवतां टिप्पण्णीः पठन्नासम्, तथा च, मयावलोकितं यत् जल-समस्यां आलक्ष्य अनेके जनाः सुबहु लिखितवन्तः। बेलगावी-स्थितः(Belagavi) पवन-गौराई, भुवनेश्वरस्य सितांशु-मोहन-परीदा, चैतौअतिरिच्य यश-शर्मा, शाहाब-अल्ताफ-प्रभृतयः बहवो जनाः जल-सम्बद्धानि समाह्वानानि संलक्ष्य मां लिखितवन्तः। अस्मदीयायां संस्कृतौ जलस्य अतितरां महत्त्वं वर्तते। ऋग्वेदे आपःसूक्ते जल-विषये सन्दर्भितमस्ति:-

आपो हिष्ठा मयो भुवः, स्था न ऊर्जे दधातन, महे रणाय चक्षसे,
यो वः शिवतमो रसः, तस्य भाजयतेह नः, उषतीरिव मातरः।

अर्थात्, जलं हि जीवन-दायिनी शक्तिः, ऊर्जायाः स्रोतश्चास्ति। आपः मातरः अर्थात् जलं मातृवत् अस्मभ्यं निजाशीर्वादं ददातु। स्वीयानुग्रहः अस्मत्सु सर्वदैव सन्धारयतु। जलाभावात् देशस्य अनेके प्रभागाः प्रतिवर्षं प्रभवन्ति। भवन्तः आश्चर्यमनुभविष्यन्ति यत् समग्रेऽपि वर्षे वृष्ट्या यज्जलम् अवाप्यते तस्य केवलं प्रतिशतं अष्टमितो भागः अस्माकं देशे संरक्ष्यते। केवलंप्रतिशतंअष्टमितोभागः एव ! साम्प्रतं हि कालः सम्प्राप्तः। अस्याः समस्यायाः समाधानं नूनम् मृगणीयम् । दृढं विश्वसिमि,वयं अन्याः समस्याः इव, जनसहभागिता-माध्यमेन, जनशक्त्या च, त्रिंशदुत्तर-शत-कोटि-देशवासिनांसामर्थ्येन, सहयोगेन सङ्कल्पेन च सङ्कटमिदम् अपि समाधास्यामः । जलस्य महत्तां सर्वातिशायिनीं परिभाव्यदेशे नूतनः जल-शक्ति-मन्त्रालयः विरचितः। अमुना जल-सम्बद्धान् सर्वान् अपि विषयान् आलक्ष्य जवीयस्या गत्या निर्णयाः विधास्यन्ते। कतिपय-दिनेभ्यः प्राक् अहं किञ्चित् पृथक्तया कर्तुं प्रायतम्। अहम् अशेष-देशस्य सरपञ्चेभ्यः ग्राम-प्रधानेभ्यश्च पत्रम् अलिखम्। अहं तान् अलिखं यत् जल-संरक्षणार्थं, जल-सञ्चयार्थं च, वर्षायाः प्रत्येकमपि बिन्दुं रक्षितुं, ते ग्राम-सभायाः उपवेशनम् आयोज्य,ग्रामवासिभिः साकं समुपविश्य च विचार-विमर्शं कुर्युः। प्रसन्नतामनुभवामि यत् ते अस्मिन् कर्मणि उत्साहं प्रदर्श्य मासेऽस्मिन् द्वाविंशे दिनाङ्के सहस्रशः पञ्चायतेषु कोटि-कोटि-जनाः श्रमदानं कृतवन्तः। ग्रामे ग्रामे जनाः जलस्य प्रत्येकमपि बिन्दुं सङ्क्षेतुं सङ्कल्पितवन्तः।

अद्य, 'मन की बात'-कार्यक्रमे अहम् अन्यतमस्य सरपञ्चस्य निवेदनं श्रावयितुं वाञ्छामि। शृण्वन्तु,झारखण्डस्य हजारीबाग-जनपदे कटकमसांडी-प्रभागे लुपुंग-पंचायतस्य सरपञ्चः अस्मान् सर्वान् किं सन्दिष्टवान्।

'मम नाम दिलीपकुमार-रविदासः अस्ति। जल-रक्षणार्थं प्रधानमन्त्रि-महोदयः अस्मान् पत्रं प्रेषितवान्, तदा विश्वासो नैव जातः यत् एतदर्थं प्रधानमन्त्री अस्मान् पत्रम् अलिखदिति। यदा वयं द्वाविंशेदिनाङ्केग्रामवासिनः सर्वान् आकार्य, प्रधानमन्त्रिणः पत्रञ्च पठित्वा श्रावितवन्तः तदा ग्रामवासिनः अतितरां उत्साहिनो जाताः। जल-रक्षणार्थञ्च तडागस्य स्वच्छीकरणार्थं नूतन-तडागस्य च निर्माणार्थं श्रम-दानं कृत्वा स्व-स्व-सहभागित्वं निर्वोढुं सन्नद्धाः जाताः। वर्षायाः आगमनात् प्राक् समुपायमेनं कृत्वा भविष्यति काले वयं जलाभावं नैव सम्मुखीकरिष्यामः। शुभमिदं सञ्जातं यत् अस्माकं प्रधानमन्त्रि-महोदयः अस्मान् समुचित-काले एव प्रबोधितवान्।'

बिरसामुण्डा-महाशयस्य धरा, यत्र प्रकृत्या साकं सामञ्जस्यं स्थापयित्वा निवसनं हि संस्कृतेः अङ्गत्वेन प्रवर्तते। तत्रत्याः जनाः, पुनरेकवारं जल-संरक्षणस्य कृते स्वीयां सक्रिय-भूमिकां निर्वोढुं सन्नद्धाः सन्ति। मम पक्षतः, सर्वेभ्यो ग्राम-प्रधानेभ्यः, सकलेभ्यः सरपञ्चेभ्यश्च, तेषाम् अस्यै सक्रियतायै भूयस्यः शुभकामनाः। अशेष-देशे तादृशाः अनेके सरपञ्चाः सन्ति, ये हि जल-संरक्षणस्य दायित्वं स्वीकृतवन्तः। अन्यतम-प्रकारेण सम्पूर्णस्यापि ग्रामस्य एव अयम् अवसरः सञ्जातः। एवं प्रतीयते यत् ग्रामवासिनः, साम्प्रतं निज-ग्रामेषु,जल-मन्दिरस्य निर्माण-स्पर्धायां व्यापृताः अभवन्। यथाहं पूर्वम् उक्तवान्, सामूहिक-प्रयासैः बृहन्तो रचनात्मकाः परिणामाः अधिगन्तुं शक्यन्ते। सम्पूर्णेऽपि देशे जल-सङ्कटस्य समाधान-हेतोः किञ्चित् समन्वित-रूपात्मकम् एकमेव सूत्रं भवितुं नैवार्हति। एतदर्थञ्च देशस्य पृथक्-पृथक्-भागेषु, भिन्न-भिन्न-रूपेण, प्रयासाः अनुष्ठीयन्ते। किन्तु सर्वेषां लक्ष्यम् एकमेवास्ति, तथा च, तदस्ति-जल-संरक्षणम्।

पञ्जाब-राज्ये जल-निर्गमन-प्रणालिकाः सुव्यवस्थाप्यन्ते। अमुना प्रयासेन जलावरोधस्य समस्याः समाधीयन्ते। तेलंगाना-राज्ये [Thimmaipalli]-थिमाईपल्ली-स्थलेजल-वापी-निर्माणेन ग्रामवासिनां जीवनानि परिवर्तन्ते । राजस्थाने कबीरधाम्नि, क्षेत्रेषु विरचितैः लघु-तडागैः बृहत्-परिवर्तनं समापन्नम्। अहं तमिलनाडु-राज्यस्य वेल्लोरे (Vellore) विहितस्य अन्यतम-सामूहिक-प्रयासस्य विषये पठन्नासम्, यत्र नाग-नद्यां (Naagnadhi) पुनर्जीवयितुं विंशति-सहस्रं महिलाः सम्भूय प्रयतितवत्यः। अहं गढ़वालस्य तासां महिलानां विषयेऽपि अपठम्, याः मिथः सम्भूय वर्षाजल-कृषि-विषये सुतरां शोभनं कार्यं कुर्वन्ति। विश्वसिमि यत् एवंप्रकारकाः नैकविधाः प्रयासाः अनुष्ठीयन्ते, तथा च वयं सम्भूय, दृढतया प्रयासान् कुर्मः, तदा असम्भवमपि सम्भवं कर्तुं शक्नुमः। यदा जनाः सम्योजिताः भविष्यन्ति, जलं संरक्षिष्यते । अद्य 'मनकीबात'-माध्यमेनाहं देशवासिनां समक्षम् अनुरोध-त्रयं विदधामि।

मम प्रथमोऽनुरोधोऽस्ति - यथा देशवासिनः स्वच्छतामभिलक्ष्य जनान्दोलन-रूपं दत्तवन्तः। आगच्छन्तु, तथैव जल-संरक्षणार्थं एकं जनान्दोलनं प्रारभेमहि । वयं सर्वे सम्भूय जलस्य प्रत्येकमपि बिन्दुं संरक्षितुं सङ्कल्पयेम, तथा चाहं विश्वसिमि यत् जलन्तु परमेश्वरेण उपाहृतःप्रसादोऽस्ति, जलं हि स्पर्शमणेः रूपमस्ति। पूर्वं कथ्यते स्म यत् स्पर्शमणेः स्पर्शेन लौहमपि कनकायते । नूनं निगदामि, जलं स्पर्शमणिरस्ति, तथा च, स्पर्शमणिना, जलस्य स्पर्शेन, नवजीवनं निर्मीयते। जलस्य प्रत्येकमपि बिन्दुं रक्षितुं जागरूकताभियानम् आरभन्ताम्। अस्मिन् जल-सम्बद्धाः समस्याः सूचयन्तु, युगपदेव, जल-संरक्षणस्य पद्धतीः प्रचारयन्तु प्रसारयन्तु च। विशेषरूपेणाहं विभिन्न-क्षेत्रीयान् विशिष्टान् महानुभावान्, जल-संरक्षणार्थं, नवाचार-युतानाम् अभियानानां नेतृत्वार्थं साग्रहं निवेदयामि। भवतु नाम सः चलचित्र-संसारो वा क्रीडा-जगत्, भवन्तु नाम ते सञ्चार-माध्यमानाम् अस्मदीयाः सुहृद्वर्याः वासामाजिक-सङ्घटनैः सम्बद्धाः जनाः वा स्युः सांस्कृतिक-सङ्घटनैःसम्बद्धाःजनाः, कथा-कीर्तन-कर्तारो वा भवन्तु, प्रत्येकमपि निज-निज-रीत्या अस्य आन्दोलनस्य नेतृत्वं नूनं कुर्युः। समाज-जागर्तिं विदध्युः, समाजेन सर्वान् संयोजयेयुः, समाजेन सम्भूय सन्नद्धाः स्युः। भवन्तः पश्यन्तु, वयं निज-नेत्रभ्यामेव परिवर्तनम् अवलोकयितुं शक्ष्यामः।

देशवासिनां समक्षं मम द्वितीयानुरोधोऽस्ति। अस्माकं देशे जल-संरक्षणार्थम् अनेके पारम्परिकाः प्रकाराः शताब्देभ्यः समुपयोज्यन्ते। अहं भवतः सर्वान्, जल-संरक्षणस्य तान् पारम्परिकान् प्रकारान् संविभाजयितुं साग्रहं निवेदयामि। भवतु कश्चन यदि, पूज्य-बापू-वर्यस्य जन्म-स्थानं पोरबन्दरं गच्छति चेत्, तदा पूज्य-बापू-चरणस्य गृहस्य पश्चवर्तिनि भागे एव अपरमेकं गृहमस्ति, तत्र, द्विशत-वर्ष-प्राचीना जलवापी (Water Storage Tank) वर्तते। अद्यापि तस्यां जलं वर्तते, तथा च, वर्षायाः जलावरोधस्य व्यवस्थास्ति, अत एवाहं, सततं कथयन्नासं यत् यः कश्चन अपि कीर्ति-मन्दिरं गच्छेत्, सः नूनं तां जलवापीमवलोकयेत्। एतादृशाः अनेकविधाः प्रयोगाः प्रति-स्थलं भवितारः।

भवतां सर्वेषां समक्षंममतृतीयानुरोधोऽस्ति। जल-संरक्षण-दिशि महत्वपूर्ण-योगदान-कर्तॄणां, स्वयंसेवि-संस्थानां,क्षेत्रेऽस्मिन् कर्मनिरतानां प्रत्येकमपि जनानां, सञ्चित-सूचनाः, भवन्तः संविभाजयन्तु येन हि, जलस्य कृते सुतरां समृद्धानां समर्पितानां, सक्रिय-सङ्घटनानां, जनानां चैको दत्तकोषः[database]सन्नद्धीभवेत्। आगच्छन्तु, वयं जल-संरक्षणेन सम्बद्धानाम् अधिकाधिकानां प्रकाराणां सूचीमेकां विरचय्य जनान् जल-संरक्षणार्थं सम्प्रेरयेम। भवन्तः सर्वेऽपि #JanShaktiyJalShakti- इति हैशटैग-समुपयोगं कृत्वा स्वीयं विवरणं सम्विभाजयितुं शक्नुवन्ति।

मम प्रियाः देशवासिनः, अन्यस्यापि एकस्य वृत्तस्य कृतेऽहं भवतां, जगतः सर्वेषां जनानामपि कार्तज्ञ्य-ज्ञापनं कर्तुं वाञ्छामि। जून-मासे एकविंशे दिने पुनरेक-वारं योग-दिवसे सक्रियतया, उत्साहेन च, एकैक-कुटुम्बस्य तिसॄणां चतसॄणां च वंशानां जनाः, सम्भूय आगत्य च योग-दिवसमायोजितवन्तः। ॥olistic Health Care - समग्र-स्वास्थ्य-परिचर्यायै या हि जागरूकताधिगतास्ति, तया योग-दिवसस्य माहात्म्यमेधमानं प्रवर्तते। विश्वस्मिन् विश्वे प्रतिकोणं, सूर्योदय-समकालमेव यदि कश्चन योग-प्रेमी, आदिदेवस्य सूर्यस्य स्वागतं करोति चेत्तदा सूर्यस्य अस्तङ्गमनकाले यात्रैषा पूर्णतां याति। कदाचिदेव जगति किञ्चित् स्थलं तादृशं स्यात्, यत्र मानवो भवेत् तथा च, योगेन संयुक्तो नैव स्यादिति, एतावत् व्यापकं बृहच्च रूपं, योगेन सन्धारितमस्ति। भारते, हिमालयात् हिन्द-महासागरं यावत्, सियाचिन-तः समुद्रान्तवर्ति-नौपोत-पर्यन्तं, वायु-सेनातः वायुयान-वाहक-पर्यन्तं, वातानुकूलित-व्यायाम-शालातः निदाघ-संतप्त-मरुभूमि-पर्यन्तं, ग्रामेभ्यः आरभ्य महानगराणि यावच्च- यत्रापि सम्भवमासीत्, तादृशे प्रतिस्थलं नकेवलं योगाभ्यासः साधितः, परञ्च सामूहिक-रूपेण सहर्षञ्च योगाभ्यासः आमानितः।

Twitter-इत्यत्र मह्यं प्रदर्शितं यत् विश्वस्य अनेकेषां देशानां राष्ट्रपतयः, प्रधानमन्त्रिणः, प्रसिद्धाः विशिष्टाश्च जनाः, सामान्याः नागरिकाः च, स्व-स्व-देशेषु केन प्रकारेण योगाभ्यासं कृतवन्तः। तस्मिन् दिने, जगदिदं प्रसन्नं बृहद्-कुटुम्ब-वत् अवालोक्यते स्म।

वयं सर्वे जानीमः यत् स्वस्थ-समाजस्य निर्माणार्थं सम्वेदनशीलानां जनानाम् आवश्यकता भवति,योगश्च इदमेव सुनिश्चितीकरोति। अतः योगस्य प्रचारः प्रसारश्चसमाज-सेवायाः महत्-कार्यमस्ति। किम् एतादृश्यै सेवायै मान्यतां दत्वा सा नैव सम्माननीया वा? ऐषमः योगाचरणस्य समुन्नति-विकासयोः उत्कृष्ट-योगदानार्थं प्रधान-मन्त्रिणः पुरस्कार-घोषणा, मत्कृते सुतरां महती तोषप्रदा घटनास्ति। एते पुरस्काराः अशेष-जगतः तेभ्यः सङ्घटनेभ्यः प्रदत्ताः येषां विषये भवद्भिःकल्पितमपि नैव स्यात् यत् ते केन प्रकारेण योगस्य प्रचाराय प्रसाराय च महत्वपूर्णं योगदानं विहितवन्तः। उदाहरणार्थं, 'जापान-योग-निकेतनेति'-स्वीकुर्मः, येन योगाभ्यासः, पूर्णेऽपि जापाने लोकप्रियो विहितः। 'जापानयोग-निकेतनम्'- तत्रत्यानि अनेकानि संस्थानानि, प्रशिक्षण-पाठ्य-क्रमान् च सञ्चालयति, आहोस्वित् इटली-देशस्य सुश्रीः अन्टोनीटा-रोज्जी-इत्यस्याः अभिधानं स्वीकरोतु, या हि 'सर्वयोग-इंटरनेशनल'-संस्थानम् आरभ्य कृत्स्नेऽपि यूरोप-खण्डे योगाभ्यासस्य प्रचारं प्रसारञ्च व्यदधात्। इदम् स्वस्मिन्नेव प्रेरकमुदाहरणमस्ति। यदि एतत् योगाचरणेन सम्बद्धः विषयोऽस्ति चेद्, तर्हि किं भारतीयाः एतस्मिन् पश्चवर्तिनः भवेयुः? मुंगेरस्य 'बिहारयोग-विद्यालयः,अयमपि सम्मानितः, विद्यालयोऽयं विगतानेकेभ्यः दशकेभ्यः, योगाचरणाय समर्पितोऽस्ति। एवं हि, स्वामिराजर्षि-मुनिः अपि सम्मानितः। सः life mission इत्यस्य, akulish yoga-विश्वविद्यालयस्य च स्थापनामकरोत् । योगस्य व्यापकोत्स्वीकरणं योग-सन्देशस्य च प्रतिगृहं प्रापकाणां सम्माननं चेति द्वाभ्यामपि योग-दिवसोऽयं विशिष्टीकृतः।

मम प्रियाः देशवासिनः, अस्मदीया यात्रैषा अद्यारभते। नूतनोभावः, नवीना अनुभूतिः, नूत्नः सङ्कल्पः, अभिनवं सामर्थ्यम्, परम् ओमिति, अहं भवतां परामर्शान् प्रतीक्षिष्ये। भवतां विचारैः साकम् आत्मनः संयोजनं हि मम कृते अतितरां महत्वपूर्णायात्रास्ति। 'मनकीबात-''मनोगतन्तु निमित्तमेवास्ति। आगच्छन्तु, वयं मिलन्तो भवेम, सम्भाषणञ्च करवाम। भवतां भावानां श्रवणं कुर्याम्, एतान् संरक्षेयम्, अवगच्छेयञ्च। कदाचिच्च तान् भावान् जीवितुं प्रयतेयम्। भवताम् आशीराशिः सर्वदा सन्धारितो भवेत्। भवन्तः एव मदीया प्रेरणा, भवन्तः एव मामकीनी ऊर्जा। आगच्छन्तु, सम्भूय समुपविश्य च 'मनकीबात'-प्रसारणस्य आनन्दम् उपभुञ्जानाःजीवनस्य दायित्वानि अपि निभालयन्तः अग्रेसरेम। पुनरेकवारम् आगामिनि मासे 'मनकीबात'-कार्यक्रमार्थं मेलिष्यामः। भवद्भ्यः सर्वेभ्यो मदीयाः भूयान्सः धन्यवादाः। नमस्कारः।

अस्माकं प्रेरणास्रोतः- स्व.पं० रामकिशोरशर्मा,
परामर्शकाः-डॉ.रमाकान्तशुक्लः, डॉ.रवीन्द्रनागरः, डॉ.धर्मेन्द्रकुमारः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः, डॉ. अरविन्दकुमारतिवारीः
सम्पादिका-मञ्जूशर्मा, उपसम्पादकः- डॉ. सन्नीकुमार, संदीप कुमार उपाध्याय, राजेशझाः, प्रबन्धसम्पादकौ- वेदप्रकाशशर्मा, नेहाशर्मा च,

# संस्कृतभाषायां शपथग्रहितारः सप्तदशलोकसभायाः नवनिर्वाचिताः सांसदाः



बागपतः डॉ.सत्यपालसिंहः | बलियातः वीरेन्द्रसिंहः | हमीरपुरतःकुवरपुष्पेन्द्रसिंहचंदेलः | कैसरगंजतः ब्रजभूषणशरणसिंहः | उन्नावतः स्वामीसाक्षीमहाराजः | देहलीतः डा.हर्षवर्धनः | देहलीतः मीनाक्षीलेखी



देहलीतः रमेशचन्द्रविधूडी | मन्दसौरतः सुधीरगुप्ता | उज्जयिनीतः अनिलफिरोजिया | रतलामतः गुमानसिंहः | खरगोनतः गजेन्द्रपटेलः | धारतः छतरसिंहः | भोपालतः साध्वीप्रज्ञाठाकुर



राजगढ़तः रोडमलनागरः | बैतूलतः दुर्गादासउइके | शाजापुरतः महेन्द्रसोलंकी | भीलवाड़ातः सुभाषचंद्रबहेडिया | जयपुरतः रामचरणबोहरा | सीकरतः स्वामीसुमेधानन्दसरस्वती | बर्धमानतः सुरेन्द्रजीतसिंहअहलुवालिया



मेदिनीपुरतः दिलीपघोषः | बाङ्कुरातः डा.सुभाषसरकारः | बालाघाटतः सुकांतामजुमदारः | राँचीतः संजयसेठः | गोड्डातः निशिकांतदुबे | बालासोरतः-प्रतापचन्दषडङ्गी | कटकतः भतृहरिमहताब



पुणेतः गिरीशचन्दबापटः | जलगाँवतः उमेशपाटीलः | भण्डारागोदियातः सुनीजलबाबूरावः | गढ़वालतः तीरथसिंहरावतः | नैनीतालतः-अजयभट्टः | सुरेन्द्रनगरतः डा. महेन्द्रमुञ्जपरा | खेड़ालोकतः देऊसिंहचह्वाणः



बनासकांठातः-पर्वतभाईसबाभाईपटेलः | बसावातः प्रबुभाईनागरभाई | नवसारीतः सी.ईर.पाटिल | बक्सरतः अश्विनीकुमारचौबे | मधुवनीतः अशोककुमारयादवः | रोहतकतः डा.अरविंदशर्मा | सिरसातः सुनीतादुग्गल



मङ्गलदोईतः दिलीपसायकिया | उत्तरगोवातः श्रीपादनाईकः | उत्तरकन्नड़तः अनन्तकुमारहेगड़े | अजमेरतः भगीरथचौधरी | चित्तौड़गढ़तः चन्द्रप्रकाशजोशी | मेरठतः राजेन्द्रअग्रवालः | फतेहपुरतः ज्योतिसाध्वीनिरंजन

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल-ऑफसेट-प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः *sanskritsamvad@gmail.com,* *RNI No. : DELSAN/2011/38660* *DL(E)-20/5534/2018-20* राष्ट्रियसंस्कृतसंस्थानस्य अनुदानेन प्रकाश्यमानं पत्रमिदम्।